
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

203

॥ रसतरंगिणिचिपोथीहोय॥

1

श्रीगणेशाय नमः ॥ ॥ श्रीगुरुभ्यो नमः ॥ ॥ ॥ लक्ष्मीमालोक्य लुभ्यन्निगममुपह
र नृछाञ्चयन्नयज्ञजं तून हस्त्रेशोणा ॥ क्षिपश्यन्नुशामितदशमुखं वीक्ष्य रोमांचमंच
न् ॥ हत्वा हैय्यंगवीनं चकितमपसरन्म्लेच्छरक्तै दिगंतां सिंचन्नंदे तेन भूमिंतिलमि
व तुल्लयन्पातु मां पीतवासाः ॥ १ ॥ भारत्याः शास्त्रकांतारश्रांतायाः शांतिकारिणी ॥ क्रि
यते भानुना भूरिरसा रसतरंगिणी ॥ २ ॥ वाणीकमलिनीभानोरेषा रसतरंगिणी
हंसाः कृतधियस्तत्र युक्तमत्र प्रतीयतां ॥ ३ ॥ गिरां देवितरंगिण्यां वारयन्कुरवी
रहानु ॥ पद्भविष्यति लोकानां भाविलो विरलो रसः ॥ ४ ॥ हेतोः पूर्ववर्तित्वनियमात्
पूर्वमेव तस्योपन्यासः समुचितः ॥ रसस्य हेतवो भावाद्यस्तेन रसात्पूर्वं भावाद
य एव निरूप्यंते ॥ रसानुकूलो विकारो भाव इति ॥ विकारो अन्यथाभावः ॥ विकारो द्वि

राम०
२

विधः॥ आंतरः शारीरश्च॥ आंतरो द्विविधः॥ स्थायी भावो व्यभिचारिभावश्चेति॥
शारीरस्तु सात्त्विकभावः॥ यत्तु मनोविकारो भावः॥ तथा च देहविकारे स्वेदादौ भाव
पदप्रयोगो गौण इति॥ तन्न॥ तुल्यवदुभयत्रापि भावपदप्रयोगेण विनिगंतुमशक्यत्वा
त्लक्षणानुरोधेन लक्ष्याव्यवस्थितेः॥ तत्र इतरभावस्यात्मभावत्वोपनायकत्वे सति स

विजातीय

जातीयैर्भावैर्नभिभाव्यः प्रथमः॥ इतरानभिभाव्यो मनोविकारः सकलप्रधानो मनोवि
कारो वा स्थायी भावः॥ न च व्यभिचारिष्वतिसात्त्विकभावेष्वतिव्याप्तिर्वा व्यभिचारः॥ तस्येत
रभावस्यात्मभावत्वोपनायकत्वाभावात्॥ चरमसमयपर्यन्तस्थायित्वात्स्थायित्वव्यपदे
शः॥ स चाष्टधा॥ तत्र भरतः॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा॥ जुगुप्सावि
स्मयश्चेति स्थायिभावाः प्रकीर्तिताः॥१॥ तत्रेष्टवस्तुसमीहाजनिता मनोवृत्तिरप
रिपूर्णा रतिः॥ सा च क्वचिद्दर्शनेन॥ क्वचिच्छ्रवणेन॥ क्वचित्स्मरणेन॥ यथा॥

॥रस०

॥तर०॥

चक्षुर्यस्य कृषीवलो निगदितं पीयूषपाथोधरो भूसंज्ञा परिचारिका समभजन् निस्फीतं
स्मितं दोहदम्। संतापं तरुणार्ककर्कशरुचिर्निश्वासवातो हतिं कस्मादेष सहिष्यते स
खि सत्वं प्रेमद्रुमः कोमलः॥ २ कोमलपदादपूर्णता॥ कुतूहलकृत वचन वेषवैसादृ
श्यकृतो मनोविकारोऽपरिमितो हासः वचनभेदवेषभेदकृतो भयक्रोधेवा नातिव्याप्तिः॥
तत्र कुतूहलकृतत्वाभावात्। यथा॥ तातचरणानां॥ आगच्छन्नारोपकंठमिलितैरावे
ष्टितो बालकैः शुद्धांतपरिचारिकाभिरचिरं सोल्लासमावेदितः॥ साकूतं सकुतूहलं
बलिवधूवृंदे पुरोदापयत्यसन्नं किंचिदुदंचितास्मितलवः पायात्स वो वामनः॥ लव
पदादपूर्णता॥ इष्टविश्लेषजनितो रस्यनालिंगितोऽपरिमितो मनोविकारः शोकः
न त्विष्टविश्लेषजनितविप्रलंभश्रृंगारस्य करुणरसत्वापत्तिः॥ न स्मरस्यालिंगि
तत्वात्। न च रतिः। प्रीतिस्तया विनाशो कोऽपि नो सह्यत इति तथात्रासंभव इति वाच्यं

राम०
॥२॥

इष्टसमीहाजनितमनोविकृतेरनेरूकत्वात् ॥ कुमारसंभवे रत्याः कादंबर्यां महाश्वे
तायां रघुवंशे ऽजस्य प्रलापे करुण एव रसस्तत्र तत्र बाधनिश्चयात् दृष्टवस्तुसमी
हायाऽभावात् ॥ यत्र च मृतेऽ एकजीवित्ताशा तत्र शृंगार एव रसः बाधसंदेहस्य ग्राह्य
संदेहपर्यवसिततया समीहायाऽप्रतिबंधकत्वात् ॥ तथा च यूनोरेकतरस्मिन्मृते
प्रलापः करुण एव रसः जीवतोः विश्लिष्टयोः प्रलापः शृंगाररसः ॥ अत एव रस
दीपिकायां करुणरसोदाहरणं ॥ मयि जीवति नाथ जीवसी सत्यिधायोच्छ्रितपातया
पुनः दग्धोऽपुरुषाकृतिः क्षितौ हरकोपानलभस्म केवलं ॥ ननु विप्रलंभशृंगारस्य पूर्वानुराग
मानप्रवासकरुणात्मकत्वाज्जीवतोरपि विप्रलंभस्य करुणरसत्वमायातमिति चेत्सत्यं
तत्र करुणरसस्यांगत्वेन भासमानत्वात्करुणात्मकत्वव्यपदेशः ॥ यथा विरहे मूर्च्छया प
तंती नयने नाश्रुजलेन सिंचमानां ॥ समवेक्ष्य रतिर्विनिश्वसंती करुणाकुलमुल्लिता बभू
वशोभो: ८

करुणाकुस्मालितपद्यादपूर्णता ॥ अवज्ञादिकृतः ॥ प्रमोदप्रतिकूलोपरिमितो मनोविका
रः क्रोधः ॥ प्रमोदप्रतिकूल इति विशेषणाद्दशमुखदुर्वचनावमानितस्य रामस्य वीर
रसे नातिव्याप्तिः ॥ यथा परशुरामवाक्यं ॥ नाद्यारभ्य करोमि कार्मुकलताविन्यस्तहस्तो
भुजः किंचित्सास्त्रभासि लोचनयुगे तावन्निमेषोदयात् ॥ यावत्सायककोटिपाटितरि
पुस्त्रायालमौलिस्खलन्मज्जीमास्यपनस्य रागपटलै रामोदिनीमेदिनी ॥ ९ ॥ किंचित्सा
स्त्रत्वादपूर्णता ॥ शौर्यदानदयान्यतम * कृतो मनोविकारोऽपरिपूर्णः ॥ उत्साहः
र वीरस्त्त्र युद्धवीरदानवीरदयावीरभेदात्त्रिधा युद्धवीरोत्साहो यथा ॥ सेनां संघटयन्
युतिं द्विगुणायन् चापं चमत्कारयन् ॥ नेत्रस्याभिमुखो भविष्यति जगद्विद्रावणो रावणः
इत्युत्साहविचारमूढहृदयो देवो रघूणां पतिः ॥ ज्याविन्यासविधिं विनैव विशिखान्बा
णासनेन्यस्यति ॥ १० ॥ अत्र विचारादपरिपूर्णता ॥ दानवीरोत्साहो यथा ॥ आदर्शा

र्मा

राम०

॥ ३ ॥

पु

यशशांकमंडलमिदं हर्म्यायहेमाब्जसंदीपाय मलींमहीमिवकथं नोनिस्सृवेदत्तवान्
दित्सापल्लवितप्रमोदसलिलव्याकीर्णनेत्रांबुजोजानीमोभृगुनंदनस्तदखिलंनप्रा
यशोदृष्टवान्॥ पल्लवितं नतुफलितमिसपरिपूर्णता॥ दयावीरोत्साहोयथा॥ दुस्तारसंसा
रपयोधिपारप्रकारमालोकयतोजनानां॥ समुत्थितोवक्षसिकैटभारेः कृपांकुरः कौस्तुकेनैकै
तवेन॥ अंकुरोपन्यासादपरिपूर्णता॥ अपराधविघ्नेनवरविघ्नेतसत्वाद्विजनितोमनोविका
रोऽअपरिपूर्णो॥ भयंयथा॥ तार्क्ष्यपक्षपवनोपसेवितंवीक्ष्यवीक्ष्ययदुनंदनेपुरः॥ भीतभीत
इवतत्रकालियोमंदमंदमुपसर्तुमुद्यतः॥ इवोपन्यासादपरिपूर्णता॥ अदृष्टदर्शन
स्पर्शनस्मरणजनितोमनोविक्लतिरपरिपूर्णा जुगुप्सा॥ यथा॥ शार्दूलशावकचट

म चटपाद्यमानग्रारंगभंगवतिभूस्ततिरौद्रः॥ वासंचकारनबभारतथाजुगुप्सां
दुःखेषुदुःखमतिरेवनदुःखितानां॥ नतथेतिपदादपूर्णता॥ चमत्कारदर्शनस्स

॥रस०॥

र्शनस्मरणजनितोपरिपूर्णो मनोविकारो विस्मयः॥ यथा॥ युध्यंतमर्जुनं वीक्ष्य केवा देवा क्वि
न विस्मिताः॥ नमेने बहु गोविंदो दृष्टकर्णपराक्रमः॥ नमेने बौ[illegible]तिपदाद् पूर्णता॥ शृं
गारादौ चमत्कारदर्शनाद्यत्र मनोविकृतिरंगतया भासते तत्र शृंगार एव रसः॥ य
त्र प्राधान्येन भासते तत्राद्भुत एव रसः॥ अंगतया यथा वैषम्यं श्रुतिपंकजाश्रुकरयस्या
नंदनीरं दृशोः स्वर्णालंकरणाद्य जत्निपुलको वैधर्म्यमंगाश्रियः॥ तस्मान्नूपुरपद्मरागमह
सः पादारविंदश्रियो भेदं रिंजितमेव वक्ति किं मतः शिल्पं विधेर्वर्ण्यते॥ प्राधान्येन यथा॥
विनासापंकोयं समुदयति सोरम्यसुभगः क्व रज्योत्स्ना मध्यामधिधरणि तारापरिवृढः
धनुर्धत्ते स्मारं तिरयति विहारं न तमसो निरातंकः पंकेरुहयुगलमेकेन रयति॥ इति
श्री भानुदत्तमिश्रविरचितायां रसतरंगिण्यां स्थायिभावनिरूपणं नाम प्रथमस्तरंगः
अथ विभावा निरूप्यंते॥ विशेषेण भावयंत्युत्पादयंति ये रसान् ते विभावास्ते च द्विवि

॥४॥

॥तरं०॥

राम०

॥४॥

भाआलंबनविभावाउद्दीपनविभावाश्चेति॥ यमालंब्यरसः प्रवर्त्ततेसआलंबनविभावः
योरसमुद्दीपयतिसउद्दीपनविभावः॥ तत्रालंबनविभावोयथा॥ प्राणास्यप्रतिमूर्त्तिः प्र
त्यासापुण्यलतिकायाः॥ अधिदैवतंनयनयोः साममयाकापिसासैव॥ शृंगाररस
स्योद्दीपनविभावाः तत्रभरतः॥ ऋतुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवा
भिः उपवनगमनविहारैः शृंगाररसः समुद्भवति॥ चंद्रचंदनादयऊहनीयाः॥
यथा॥ संध्याशोणांबरजवनिकाकामिनोः प्रेमनाद्यंनांदीध्वानमधुमरविरुतंमारिषः
कोपिकालः तारापुष्पांजलिमिवकिरन्सूचयन्पुष्पकेतोर्नृत्यारंभंप्रविशतिसुधादीधि
तिः सूत्रधारः हास्यस्यविभावः तत्रभरतः विपरीतालंकारैर्विपरीताचाराभिधा
नवेषैश्च विकृतैरर्थविशेषैर्हसतीतिरसः स्मृतोहास्यः॥ अंगवैकृत्यादयऊहनीयाः

॥रस॰

यथा केयूरं धरयन्नभ्रमयन्मूलिं विवर्त्तयन्बाहु॥ नेत्रांचलं चपलयन्नरयति मायां
स्त्रि:॥ शुधा या॥ करुणस्य विभावा:॥ तत्र भरत:॥ इष्टजनस्य विनाशाच्छापात्
क्लेशाद्बंधनव्यसनात्॥ अस्मादर्थविशेषात्करुणारसाख्यस्समुद्भवति॥ बंधुदा
रध्यायस्य उद्दनीया:॥ यथा॥ त्वां पश्यतो भुजगपाशनिबद्धदेहमद्यापि मे यदसवो न
बहि: प्रयांति॥ नेत्रे निमीलयसि पश्यसि नैव तावद्दास्यं मदीयमिति लक्ष्मण यु
द्धमेव रौद्रस्य विभावा: तत्र भरत:॥ आयुधरखसभिभवाद्वै कृतभेदाद्विदारणा
च्चैव संग्रामसंभवादर्थादेभ्यस्संजायते रौद्र:॥ चौरैर्दर्शनमिभर्त्सनाद्य उद्दनी
या:॥ तन्वंतीति मिरद्युतिं कृतवती प्रस्पर्धि चक्रं यथा मे षा भार्गवतावकी विजयते
निस्त्रिंशधारानिशा युद्धक्रुद्धविपक्षपक्षविरलकुंभीन्द्रकुंभस्थलत्रश्यन्मौक्तिक

॥तरं॰८

राम॰
॥९॥

राम॰
॥९॥

केनवेनपरितस्तारावलिं वर्षति॥ वीररस्यविभावाः॥ तत्र भरतः॥ असाहाय्यव
सायादविषादित्वादविस्मयान्मोहात्॥ विविधादर्थविशेषाद्वीररसोनामसंभवति
विनयबलाद्यरुहनीयाः॥ यथा॥ युद्धवीरेविभावोयथा॥ लंकाधिपस्संयतिशांक
नीयोजंभारिदंभापहबाहुवीर्यः॥ इत्यालपंतंहनुमंतमेपरामांस्मितेरुत्तरयांचका
र दानवीरस्यविभावोयथा॥ वपुषाविनयंचहंति केचिद्वचसाकेपिचरंतिचारुचर्या
अतिथौसमुपागतेसपर्यापुलकैः पल्लवयंतिकेपिसंतः॥ दयावीरस्यविभावोयथा॥ कथ
मविरलजाग्रद्भक्तिभाजोनिशायां तमसिदुरवगाहेप्राणिनोवीक्षणीयाः इतिकि
मुसमुदंचद्दीपरेखाभिरामद्युतिमुरसिमुरारिः कौस्तुभंसंबभार॥ ननुस्वनिष्ठउत्सा
हः कथमुद्दीपनविभावइतिचेत्सत्यं॥ उद्दीपनविभावोज्ञायमानएवगमकः सचस्वनिष्ठ

॥रस०॥

परनिष्ठो वेति न विशेषः ॥ अनुभावस्तु स्वनिष्ठत्वगमकस्तस्यानुमापकत्वेन पक्षवृत्ति
त्वनियमादिति ॥ ननु दयावीरः करुण एव कथं नान्तर्भवति निरुपाधिपरदुःखप्रहरणे
च्छा दया सा च करुणया विना न संभवतीति चेन्न ॥ करुणस्य स्थायिभावः शोकः दयावीर
स्य स्थायीभाव उत्साह इति स्थायीभावभेदेन भेदात् ॥ ननु दयावीरे करुणरसप्रतीतेः का ग
तिरिति चेत्सत्यं ॥ करुणया विना दयावीरस्य ॥ ननु नवान्तत्र करुणस्य अनुभावकत्वाभ्युपग
मादिति ॥ भयानकस्य विभावाः तत्र भरतः विकृतरवसत्त्वदर्शनसंग्रामारण्यशून्यगृहगम
नात् गुरून्नृपयोरपराधात्कृतकश्च भयानको ज्ञेयः बंधुवधश्रवणस्मशानदर्शनाद
यरूहनीयाः यथा उद्यत्क्रांतिकठोरकेसरदलत्पाथोधरप्रस्रवद्विद्युद्दीधितिकांचनीकृतज
गन्निश्शेषभूमीधरः स्फूर्जत्कंठनिनादभिन्नवसुधामार्गप्रविष्टद्विजप्रौढाशीर्वचनप्रहर्षितन
बल्लिर्व्याल्लोकिमायाहरिः ॥ बीभत्सस्य विभावाः तत्र भरतः अनभिमतदर्शनेन च गंधरस

॥तरंगि०॥ राम ॥६॥

स्पर्शदोषेभ्यः॥ उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति॥ ७॥ अद्भुतस्य वस्तुनां श्रवणास्मरणा
दय ऊहनीयाः यथा॥ योधानामथ वैरशोककुसुमैर्नेत्रैः सितैरंबुजैर्दंतैः कुंददलैः करैः सर
रसिजैः संपाद्य पुष्पांजलिं॥ कर्णयुगं विधाय करिणां रक्तावसिक्तां गवैः श्रेतानीव हुभिः
पुरः पुरभिदो नः संसमारभ्यते॥ अद्भुतस्य विभावाः तत्र भरतः यस्त्वतिशयार्थयुक्तं वाक्यं शि
ल्पं च कर्मरूपं च॥ तत्संबद्धुरर्थैः रसोद्भुतो नाम संभवति मायेंद्रजालादय ऊहनीयाः यथा उदा
मोद्दाम ... नादयजागृत ... वसोयं देवो मुदे वो भवतु नरहरिस्तारितारोषवि
श्वः। यस्य प्रोद्यत्प्रतापोद्धुरविकटसटाकोटिभिः पाटिता नौ मंत्रात्रं यो धराणां बहि ... प दिव
तत्र विद्युतां केतये न॥ इंद्रजाले यथा॥ व्योम्नि प्रांगणासीमि सांध्यकिरणं विस्तार्य चेलांचलं ध्वांतैः कार्मणपांसुभिस्त्रिजगतीनेत्राणि संमोहयन्॥ ताराशौक्तिकमौक्तिका

॥रस०॥८॥

निविडगाश्लेषणीरवष्टम्भनाङ्गिकीकृत्य बहिः करोति वदनां संचांशुगौमायिकः ॥ इति
भानुदत्तविनिर्मितायां रसतरंगिण्यां विभावनिरूपणं नाम द्वितीयः स्तरंगः ॥ २ ॥
अनुभावान्निरूपयन्ते येरसाननुभावयंत्यनुभावगोचरतां नयंतीतितेनुभावाः ॥ कटाक्षादयः ॥ कर
णत्वेनैनुभावकता करणत्वं च फलायोगव्यवच्छिन्नकारणत्वं ॥ ननु रसे कथमनुभावकापेक्ष
ति चेद्यतः स्थायिभावः परिपूर्णो रसस्तस्य चांतरत्वाज्ज्ञापकेन विना कथं ज्ञानमित्यनुभा
वस्यापेक्षणीयत्वात् ॥ ननु कटाक्षादयः कथमुद्दीपनविभावा न भवंति दृष्टे कटाक्षादौ
कामिनो विकारः परिपूर्णो भवत्यनुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् ॥ किंच प्राचीन
संमतिरपि ईषद्वक्रितपक्ष्मपंक्तिभिरनाकूतस्मितैर्वीक्षितैरेतैरेवतवा यत्सुंदरीकर
क्रोडं जगद्वर्तते उंतः पांसुलहेमकेतकदलद्रोणी दुरापश्रियादो मूलस्य विभावनादिह

॥७॥

म० तरंगि०॥ ॥७॥

पुनः कूरे किमाकांक्षसी ॥ ९ ॥ इत्यादि ॥ इति चेत्सत्यं ॥ कटाक्षादीनां करणत्वेनानुभावकत्वे
विषयत्वे नोद्दीपनविभावत्वं तथाच्चात्मनि रसावभासकत्वेन नायिकप्रति कटाक्षादयो नु
भावास्तेन्च दृष्टिगोचरीभूताः कामिनो मनोविकारं विकारयंतो विषयत्वे नोद्दीपन
विभावा इति ॥ स चानुभावः कायिकमानसाहार्यसात्विकभेदाच्चतुर्धा कायिका भुजाक्षे
पादयो मानसाः प्रमोदादयो नाद्यन्चतुर्भुजत्वज्ञानमाहार्यः ॥ सात्विका रोमांचादयः
शृंगारस्यानुभावाः तत्र भरतः ॥ नयनवदनप्रसादैः स्मितमधुरवचो धृतप्र
मोदैश्च ॥ विविधैरंगविकारैस्तस्याभिनयः प्रयोक्तव्यः ॥ कटाक्षादय ऊहनीयाः ॥ यथा
मुक्ताहारः स्तनकलशयोः कर्णयोः कर्णिकारं मौलौ मालापरिभवभयादेव दूरेन्च वारि
दृष्टे भ्रष्टेसमजनि पुनः सुभ्रुवो भूषणाय प्रातर्वातोन्नरलकमलद्रोहदक्षः कटाक्षः ॥ ३ ॥

प्रवत्क

15

॥ रस० ॥

हास्यस्यानुभावः ॥ तत्र भरतः ॥ विकृताकारैर्वाक्यैरंगविकारैश्च विकृतवेषैश्च ॥ ६ ॥
हास्यं जनयेद्यस्मात्तस्माज्ज्ञेयो रसो हास्यः ॥ आस्याधरविवरणकपोलस्पंददृष्या
कुंचनादय ऊहनीयाः ॥ यथा ॥ पात्रीकृतस्य कपालमंडलमिदं पीयूषभानोः कलांव
र्णीकृत्य फणामालीं फणीपतेः संपाद्यतां स्मिन्नू शिखां ॥ सायं दीपविधिं वितन्वति शिशो
मेंदहसं स्यात्तया किंचित्कुंचदपांगभंगकुटिला दृष्टिः समारोपिता ॥ ५ ॥ करुणस्या
नुभावः ॥ तत्र भरतः ॥ श्वसनै रुदितैः मोहैः प्रलापपरिदेवनप्रलयैः ॥ अभिनेयः
करुणरसो देहायासाभिघातैश्च ॥ ६ ॥ मुखशोषणवैवर्ण्यादय ऊहनीयाः ॥ यथा
तातेन निर्गच्छति गणपतौ नाकमध्यापितस्याचान्चांदेव्यास्यजातशिथिलंकंकणं
नैवदोष्णाः ॥ अद्याप्याद्रीभवति कुचयोर्नापि पाटीरपंको नेत्रे निर्यस्य पासिन पुनः कज्ज

ला० ४

॥ ८० ॥

॥ तरंगि० ॥

॥ ८० ॥

लेस्थैर्यमेति ॥ ७ ॥ रौद्रस्यानुभावाः ॥ तत्र भरतः ॥ नानाप्रहरणसंकुलाशिरःप्रकंपैः ॥
करायविशेषैः घोरैरर्थविशेषैस्तस्याभिनयः प्रयोक्तव्यः भ्रुकुटीदंतौष्ठपीडनाद्यैरुह
नीयाः यथा येये भीमेन बद्धभ्रकुटिघनरवं दंतनिष्पीडितोष्ठं चिक्षिप्ता व्योम्नि विध्याच
लचटुलचमत्कारभाजां करीन्द्राः ॥ तेषामेषा कपोलादिवमयविघ्नुताकाचिदुःयलग्ना
विवेपीयूषभानोर्मधुकरपटलीलांछनस्यच्छलेन ॥ ८ ॥ वीरस्यानुभावाः ॥ तत्र भरतः
धैर्यैः शौर्यैः वीर्यैरुत्साहपराक्रमप्रभावैश्च ॥ वाक्यैराक्षेपकृतैर्वीररसः सम्यगभि
नेयश्चविनयदानदयादुं ॥ १० ॥ नन्वत्रौद्र्यस्यारसस्य ज्ञापकाः शरीरधर्मा विनुमर्हतिते
एवसर्वत्रोक्तास्तथाच धैर्योत्साहौ न शरीरधर्माविति चेत्सत्यं ॥ धर्म्यपदेन चांचल्याभा
व उत्साहपदेनाश्रुपुलकादयोलक्षिताः ॥ पश्चा ॥ अनुभावश्चतुर्विधः तत्र मानसोप्य
पमुक्तः सच ज्ञायमान एव गमकस्तेषु च मानसत्वेंद्रियकत्वेयत्तिनविशेषः ॥ विनय

उी

म

सच

17

॥१८०

बलाद्दयऊह्नीयाः ॥ युद्धवीरानुभावो यथा ॥ अग्रेवासवजित्समग्रसमरव्यापारदीक्षा
गुरुः ॥ पार्श्वे लक्ष्मणविपक्षपक्षदमनक्रीडाचणो रावणः ॥ इत्थं जल्पति सर्वतः परिजने
संध्यास्मृतिं कुर्वतः श्रीरामस्य न कुंभकर्णदलनेक्षणः सकोपि क्रमः ॥ यथा दानवीरा
नुभावाः ॥ औदास्यं नविधेहि गच्छ नगरं नूत्नं संवीक्ष्य मद्राज नयाचे किंतु भवंतमेतदखिल
कोसलक्षणाक्षम्यताम् ॥ दासश्चेदहमस्मि चेद्वसुमतीं सर्वैव सामग्र्यतां स्वर्गो चेत्कुरु
दाक्षिण्यधनपतेरानीय संपाद्यते ॥ दयावीरानुभावो यथा ॥ ध्वांतस्तोमेध्रेजगद्भयक
रपाथोधरे वर्षति क्रोडव्याकुलवत्सगोकुलदयार्द्रीनेक्षणः केशवः ॥ हस्तन्यस्तमही
धरच्युतिभिया नैवांगुलीपल्लवैस्तस्तं वेणुमुरीकरोति न तनोः स्वस्ते हरस्सस्तु कम्
भयानकस्यानुभावाः ॥ तत्र भरतः ॥ करचरणनेत्रमस्तकसर्वांगानां प्रकंपनेश्चैव

॥६१॥

॥तरंगि०

॥१॥

18

शुष्कोष्टतालुकंठैर्भयानको नित्यमभिनेयः॥ रोमांचवदनवैवर्ण्यस्वेदादय ऊहनीयाः॥
यथा॥ न्यस्तस्वस्तरुणावलीढवदनव्याकीर्णफेणोच्चयं काकुव्याकुलघोरघर्घररवे
त्स्फारीभवल्लोचनं॥ कंपप्रस्खलदंघ्रिवामननतनुश्वासोर्म्मिनुन्नाधरं विस्तीर्णं भुज
गस्य वक्त्रकुहरे कृष्णाह्यगावस्थिताः॥ बिभत्सरसोऽनुभावाः॥ तत्र भरतः॥ आनेत्र
त्रविघूर्णनलोचननासामुखाच्छादनेनैव अव्यक्तपादपतनैर्बीभत्सरसः सम्य
गभिनेयः॥ सर्वांगसंहारनिष्ठीवनादय ऊहनीयाः॥ यथा॥ कपटहोर्म्मुखकुहरे
विस्तीर्णे संवीक्ष्य दिनकरं लक्ष्मीः॥ हतदैत्यपलालकवलन्त्रासामुखमंशुकैः
पिदधे॥ अद्भुतानुभावाः॥ तत्र भरतः॥ स्पर्शग्रहणोल्लासैर्हाहाकारैश्च साधुवा
दैश्च॥ वेपथुगद्गदवचनैस्स्वरभेदैरभिनयस्तस्य॥ निमेषणप्रेक्षणरोमांचा

॥रस०॥ ॥तरंगि०॥

दयउहनीयाः ॥ यथा ॥ पांडवं वीक्ष्य द्दोर्दंडखंडितारातिमंडलं ॥ अद्यापि नाकिनां नेत्रे निमे
षो नैव जायते ॥ इति श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां अनुभावनिरूपणं ना
म तृतीयस्तरंगः ॥ ३ ॥ कविलविजनूतीर्थेनमः ॥ अथ सात्विकभावा निरूप्यंते ॥ तत्र भ
रतः ॥ स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ वेपथुः ॥ वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका म
ताः ॥ १ ॥ ननु चैषां सात्विकत्वं कथं व्यभिचारित्वं न कुतः सकलरससाधारण्यादिति चे
न्न ॥ अत्र केचित् ॥ सत्वं नाम परकीयदुःखभावनायामत्यंतानुकूलत्वं तेन कृता सात्वि
का इति व्यभिचारित्वमनादृत्य सात्विकव्यपदेश इति ॥ तन्न ॥ निर्वेदस्मृतिधृतिप्रभृती
नामपि सात्विकव्यपदेशापत्तेः ॥ न च परदुःखभावनायामष्टावेवोत्पद्यंत इत्यनुकूल
शब्दार्थात एव सात्विकत्वमप्येषामिति वाच्यं ॥ निर्वेदादेरपि परदुःखभावनायाम

॥१०॥ ॥१०॥

प्पुसन्तीति ॥ अत्रेदं प्रतिभाति ॥ सत्वशब्दस्य प्राणिवाचकत्वादत्र सत्वं जीववत्तु शरी
रं तस्य धर्माः सात्त्विकाः ॥ इत्थं च शारीरा भावास्तंभादयः ॥ सात्त्विकभावा इत्यभिधी
यंते ॥ स्थायिनो व्यभिचारिणश्च ते भावा आंतरतया न शरीरधर्मा इति ॥ शरीरधर्मत्वे
सति गतिनिरोधः स्तंभः ॥ न च निद्रापस्मारादावतिव्याप्तिः ॥ शरीरधर्मपदेन तेषां वारणा
त् प्रलयभावेनु चेष्टानिरोधान गतिनिरोधः ॥ अस्य विभावाः हर्षरागभयदुःखविषाद
विस्मयक्रोधाः ॥ यथा ॥ श्रोणीपीनतरा तनुः कृशतरा भूमीधरा उर्वरा वक्षोजस्य तटी कुतो
निजकुटीमानतमे यागम्यतां ॥ इत्थं कदंबकुंजनिकटे विस्रम्य मंदस्मितं गोविंदं समु
वीक्ष्य पक्ष्मलदृशा स्तंभान्निरोधीयते ॥ २ ॥ वपुषि सलिलोद्गमः स्वेदः ॥ अस्य विभावाः
मनस्तापहर्षलज्जाक्रोधभयश्रमपीडामर्ममूर्छादयः ॥ यथा ॥ कांतेन वकुचप्रांते राजंते
स्वेदबिंदवः ॥ हस्यतामदनेनेव वक्तृता मौक्तिकरश्मयः ॥ ३ ॥ विकारसमुत्थे रोमोत्थाने रोमांचः

॥रस०॥

॥नरगी॰

अस्यविभावाः ॥ शीतालिंगनहर्षभयक्रोधाः ॥ यथा ॥ बकुलमुकुलकोशारोषनिर्यन्मधु
करकूजितभाजिकुंजभूमौ ॥ पुलकयतिकपोलपालिमालिस्मितसुभगः कथमद्य नंद
सूनुः ४ ॥ गद्गदत्वप्रयोजकीभूतस्वरस्वभाववैलक्षण्यंस्वरभंगः अस्यविभावाः
क्रोधभयहर्षमदाः ॥ यथा ॥ व्यक्तिस्यात्स्वरभंगस्यकोपादुक्तिः क्रियेतचेत् ॥ इतिपत्स्यः
पुराराधा मौनमाध्यायतिस्थिती ॥ ५ ॥ भावत्वेसतिशरीरस्पंदोवेपथुः ॥ भावत्वेसतीति
विशेषणोत्सूचकस्पंदादौनातिव्याप्तिः शरीरपदंचेष्टाश्रयमात्रपरंतेनशरीरावयव
कंपेनातिव्याप्तिः ॥ अस्यविभावाः ॥ आलिंगनहर्षभीत्यादयः ॥ यथा ॥ कथयकथमुरोज
दामहेतोर्यदुपतिरेषचिनोतुचंपकानि ॥ भवंतिकरतलेयदस्यकंपः प्रियसखिमत्स्मृतिरेव
मत्सपत्नी ॥ ६ ॥ विकारप्रभववर्णान्यथाभावोवैवर्ण्यम् ॥ अस्यविभावाः ॥ मोहभयक्रोधशी

॥११॥

॥११॥

नतापश्रमाः ॥ यथा ॥ कुच्चुरेवुवर्तिकाणामाननेश्लिष्टयोस्तयोः दिवाकरकराक्रांतशशिकां
तिमिवादधौ ॥ ७ ॥ विकारजनितमक्षिसलिलमश्रु ॥ अस्य विभावाः ॥ हर्षामर्षधूमभयशोक
जृंभाशीतनिर्निमेषप्रेक्षणानि ॥ यथा विसृज विसृज चित्तदुःखधारामयमुपकंठमुपागतो
मुरारिः इति कथयितुमश्रुबिंदुरस्तोर्निपतति वक्त्रसि पक्ष्मलायताक्ष्याः ॥ ८ ॥ शारीरखेस
त्तिचेष्टानिरोधः प्रलयः शारीरखेसतीति विशेषणान्निद्रादौ नातिव्याप्तिः स्तंभा
दयः शारीरधर्माः तेषां साहचर्यकथनेन प्रलयोपि शारीरधर्म एवेति वाक्षितः ॥
तेनात्र चेष्टापदेन शारीरचेष्टैवाभिमता मनसस्तु कर्म भवति न तु चेष्टा तत एव चेष्टा
श्रयः शारीरमिति शास्त्रीयं लक्षणं ॥ अस्य विभावा रामोलंघ्यादयः ॥ यथा नो वक्त्रे
नमितं धुतं न च शिरो व्यावर्तितं नो वपुर्वासो न श्लथमाहृतं निगदितं नो वा निषेधाक्षरं

॥ रस० ॥

॥ तरंगि० ॥

भार

शोणो नापि विलोचनं विरचितं क्रीडाकलाकातरं चेतः केवलमाननेन मधुरिपोर्व्यापारितं राधया ॥ इं जृंभा च ॥ न वर्मसात्विकभाव इति भाति ॥ कूजं नन्नमुल्लसल्कुचयुगं स्विद्यत्कपोलस्थलं कंचस्वक्ष्मगलद्दुकूलमुदयन्नाभिप्रमद्कूनतं ॥ बालाग्रांगुलिवद्धबाहुपरिधिमुंचांद्दृवत्तत्रिकं चुंचत्कंचुकसंधि दर्शितलसद्दोर्मूलमुज्जृंभते सा दोर्श्रंगारतिलकादौ च सात्विकभावसामांध्यिकरणपदर्शनात् ॥ नन्वसौ सात्विकभावानुभावो वेति विनिगमना विरह इति चेत्सत्यं ॥ अनुभावत्वेपि सात्विकभावत्वे बाधकाभावात्पुलकादौ तथादृष्टत्वात् ॥ न चांगाकृष्टि नेत्रमर्दनादीनामपि भावत्वापत्तिः ॥ तेषां भावलक्षणाभावाद्रसानुकूलो विकारो भाव इति हि तल्लक्षणं ॥ अंगाकृष्यादयो हि न विकाराः ॥ किंतु शरीरचेष्टाप्रसक्षासिद्धमेतदंगाकृष्टिरक्षिमर्दनं च पुरुषेच्छया विधीयते परित्यज्यते च जृंभा च विकारादेव भवति तन्निवृत्तौ निवर्त्तते चेति ॥ यथा ॥ आच्छा॰ मानेरहसि स्थि

धा

॥ १२ ॥

॥ १२ ॥

तायाः संभाव्यजृंभामचलात्मजायाः॥ चाटुस्वनिस्मेरमुखोमहेशः करांगुलीभिः कूलयांचकार॥ इतिश्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां सात्त्विकभावनिरूपणंनामचतुर्थस्तरंगः॥ अथव्यभिचारिभावानिरूप्यंते॥ तत्रभरतः॥ निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः॥ आलस्यंचैवदैन्यंचचिंतामोहःस्मृतिर्धृतिः॥ १॥ व्रीडाचपलताहर्षआवेगोजडतातथा गर्वोविषादऔत्सुक्यंनिद्रापस्मारएवच॥ २॥ सुप्तिर्विबोधोमर्षश्चाप्यवहित्थमथोग्रता॥ मतिर्व्याधिस्तथोन्मादस्तथामरणमेवच॥ ३॥ त्रासश्चैववितर्कश्चविज्ञेयाव्यभिचारिणः॥ त्रयस्त्रिंशत्समाख्याताः नाम्नातुव्यभिचारिणः॥ ४॥ इतस्ततोरसेषुसंचारित्वमनेकरसव्याप्यत्वंवाव्यभिचारित्वं॥ नचरोमांचादावतिव्याप्तिस्तेषामपिसंचारित्वात्तेचभावाशारीराव्यभिचारिणएतेचांतराव्यभिचारिणइतीयांस्तुविशेषः॥ ननुनिर्वेदादेः स्थायित्वंव्यभिचारित्वंचकथमितिचेन्न॥ रसपर्यंतंस्थायित्वमिनतस्तनोगामि

त्वंचेत्स्पृ पाश्चि भेदमाशयोभयसंभवान्॥ स्वावमानं निर्वेदः॥ संसारहेयत्वबुद्धि र्वा॥ तत्र विभावास्तत्वज्ञानापत्तीर्ष्यादयोनुभावाखेदप्रकाशाश्रुपातादयः॥ यथा क्षोणीप यैरं नम्रमायविहितं वादाय चिंत्याजितामान ध्वंसनहेतवे परिचितास्ते नेश्वराधीश्वराः वि श्लेषाय सरोजसुंदरदृशामास्यं कृतादृष्टयः कुज्ञाने नमयाप्रयागनगरे नाराधि नारायणः ॥२॥ ग्लानिः निर्बलताहानिः सहताचात्र विभावारसायासतृट्क्षुधादयः अनुभावा वैवर्ण्यशैथिल्यदृग्भ्रमणादयः॥ यथा॥ व्याहर्तुं पुनरीक्षणाय नमिरः कंठाद्बहिर्निस्सृ ताः कंठाश्लेषविधिं विधातुमपि वा नैवोन्नता दोर्लता॥ प्रातस्तल्पमपास्य गच्छति हरौ चंडां शु चंडातपाश्लिष्टक्लिष्टकुरंगभंगुररुचस्तस्याः स्थिता दृष्टयः॥ उत्कटकोटिकानिष्टप्रतिसं धानमिष्टहानिविचारो वाशंका॥ तत्र दुर्नयपरक्रौर्यादयो विभावाः॥ अनुभावाः कंपक्रिया प्रच्छादनादयः॥ [illegible] यथा॥ एते नाचित्तविलोचनाशुकजनाजिह्वाग्रदोषाः खला

॥तरंगि ॥१३॥

27

वोराः क्रूरवचः प्रपंचयशसः श्वश्रूश्च वक्षुः श्रवाः किंस्यादित्यमनर्थबीजमसकृत्संचिं
त्यवक्षोरुहि स्फुरंती किंशुकदाम वामनयनानिश्वस्य विन्यस्यति ॥ ६ ॥ परोत्कर्षासहि
ष्णुतापरानिष्टचिकीर्षावासूया ॥ तत्र विभावा मन्युदोर्जन्यादयः ॥ अनुभावाः ॥ कोप
चेष्टादोषोद्भावनादयः यथा हराद्विरासि मयाप्पलभ्य वासे निवसति कापि कला तुषार
भानोः इति लिखति विधुंतुदस्य मूर्त्तिं प्रति भवनं प्रति भूधरं भवानी ॥ ७ ॥ हर्षोत्कर्षोऽभि
रःदुःखासंभिन्नसुखानुभव उत्कर्षः ॥ तत्र विभावाः ॥ पानं अनुभावउत्तमानां निद्रा मध्य
मानां हसितं मध्यमानां रोदनं इन्द्रियमोहरूपा तत्र निद्रा तस्मादिन्द्रियसंमोहनपनचूर्ण
नसाम्ये न निद्रेव निद्रा न च हर्षव्यभिचारिभावेति व्याप्तिः तत्र हर्षमात्रसत्वान्न तु तत्रो
त्कर्षो जातिविशेषः किंच तत्र मनसो मोहो ऽत्र च मनसां प्रसाद इति स्वरूपभेदात् त्वनिद्र
रोदनादयोत्र च पुलकादयोनुभावा इत्यनुभावभेदाच्च ॥ ननु गर्जे गर्जत्क्षणं मूढ मधुया

28

॥रस०॥

वस्त्विह्रास्पदत्वमित्यादौ वीररसेपि मदो दृष्टोस्ति तत्र निद्रारोदनं चाकथमनुभावो न हि योधः
स्स्वपिति निद्राति रोदितिवेति चेत्सत्यं रसभेदेनानुभावभेदः शृंगारे ते अनुभावाः वीरे नयना
रुणत्वचमत्कारादयः सामान्ये च मदे नयनघूर्णनवचनस्खलनादयश्चेति यथा र सेना
रसस्स सोमधुत्वयमस्माकमनर्थकं ननु इति तत्र समस्तामिंद्रियं प्रतिबिंबस्य मिषेणामज्जीति
श्रायाससंभवः पराभवः श्रमः तस्य विभावाः रत्यध्वगत्यादयः अनुभावास्वेदादयः यथा
सरोमचंद्रः सहनिर्गतायाः स्वेदांबुसंसिक्तपयोधरायाः अपांगपातैर्मिथिलात्मजायाः
श्रमानशेषान् शिथिलीचकार ९० उत्थानाद्यक्षमत्वमालस्यं तत्र विभावा गर्भादयः अनु
भावाः क्रियाकातर्यादयः यथा हरेर्हरं तं रत्नहारयष्टिं करेणरोद्धुं न शशाक तावत् गिरेः
सुता गर्ववती विहस्य दृगंचलं कातरयांचकार दुःखावस्थाद्दुःखातिरेको वादैन्यं अनौज्वल्य
मिति केचित् तन्न तस्य बहिर्विषयत्वेन तदनुभावकत्वात् तत्र विभावाः चिरहदारिद्र्यादयः

॥तरंगि०५॥

॥९८॥

॥९६॥

अनुभावाः कायक्लेशश्लथसिद्धादयः ॥ यथा तानचरणानां अंगे कुंतलमालिकालतनतटे नेत्रां भ
सां निम्नगामाश्वनन्मन्मथकुंजरैर्द्दश्यान शांते चित्तलग्नं मन ॥ किंचान्यद्विरहानलेन सरसं
संदह्यमानं वपुर्गंडे पांडिमकैतवेन सुतनोः फेनोच्चयं मुंचति ॥ चिंताध्यानं ध्यै चिंताया
मिस नुशासनात् ध्यानं च न स्मरणात्मकं स्मरति भावस्याग्रे पृथक् कृत्नं कथनात् ॥ किंतु चित्रे
काग्र्यं तत्र विभावा दृष्टानवाप्तिप्रभृतयः ॥ अनुभावास्तापवैवर्ण्यबाष्पश्वासादयः ॥ यथा
शंपे ध्याय सिद्धोल्लराजतनये किं नाम जानीमहे तस्यैवास्ति तनून पादिवनतो स्तापस्समुन्मी
लती ॥ अस्तोरश्रू मिषेण गच्छति वहिर्गगात रंगावलिः पांडिम्नः कपटेन चंद्रकलिकां
तिः समुज्जृंभते ॥ मोहो वैचित्त्यं ॥ मुह वैचित्त्य इति धातोर्मोहनं मोहः इति भावव्युत्पत्त्या मोहश
ब्दः वैचित्त्यं कार्याकार्यपरिच्छेदः ॥ तत्र विभावाः भीत्यावेगानो चित्तादयः ॥ अनुभावास्तंभ
पातघूर्णनादर्शनविस्मरणादयः ॥ यथा ॥ अंतः स्मरसुवर्णकेतकदलद्रोणीद्युतिद्रोहिणीं

का

लक्ष्मीवीक्ष्यसमुच्चर्दिंदुवदनांक्षीरांबुधेरुत्थितां ॥ शंभुस्तं भवताकुलः शतमखः कर्त्तव्यमू-
ढःप्रियः सोप्यज्ञानभुजंगपाशपतितो जातस्त्रिलोकीपतिः ॥ संस्कारजन्यं ज्ञानं स्मृतिः ॥
तच्च प्रत्यभिज्ञा तद्रूपस्मरणं रूपं च संस्कारजन्यत्वेनोभयसंग्रहः ॥ अन्यथा प्रत्यभिज्ञायाः
पृथग्भावत्वापत्तेः संस्कारोद्बोधकसदृशादर्शचिंताद्यः अनुभावास्तु समुन्नयनादयः
प्रत्यभिज्ञा यथा ॥ कालिंदीसरसः समेसनभसः क्रोडे परिक्रीडते चक्रद्वंद्वमिदं सुधाकर-
कलामाक्रम्य विस्फूर्जति चंद्रोपि स्मरचाप ॥ चालनचमत्कारं समालंबते तस्मात्सेवकस्व-

१

कुंजकुहरे राधा परिभ्राम्यति स्मृतिर्यथा ॥ बध्वासवत्तं समं सकूले ॥ दरकुंचितदृ-
ष्टिराधिकायाः स्मितकिर्मीरितमानसं स्मरामि ॥ धृतिः संतोषो दुःखेप्यदुःख-

॥ १६ ॥

॥ १५ ॥

बुद्धिर्वा विभावाज्ञानशक्त्यादयः ॥ अनुभावा अव्यग्रभोगादयः ॥ यथा नूपा
वदनांबुजलग्नदृष्टिपाते मयि ॥ ३ ॥

भस्मरजांसिवेश्मविपिनंवृद्धोवृषोवाहनंचैलंचर्मतथापिमन्मथरिपोर्भोगः किमुच्च
श्यति ॥ इशात्वंकिमुहीयतेकिमुमाहादेवेति नोगीयते किंवानस्पचेदेवदेव इतिवारं
श्राजनेस्पज्यते ॥ स्वच्छंदक्रियासंकोचोव्रीडा ॥ नचशंकायां त्रासेवातिव्याप्तिः ॥ तत्र
तत्रक्रियाविरहएवनतुक्रियासंकोचः ॥ अत्रविभावादुराचारादयः ॥ अनुभावाः
शिरोनमनवदननयनप्रच्छादनादयः ॥ यथायोध्यावलीने ॥ भिन्नोभिन्नोप्रतिफलगतं
भालसिंदूरबिंदुंदष्ट्वादष्ट्वाकमलनयनाकेलिदीपप्रमेण ॥ कांतेचेलंहरतिहरिनं
लोलमालोकयंतीगात्रंप्रच्छादयतिसहसापालिपंकेरुहेण ॥ इतरेतरक्रियाकारणंक्रि
याभाः शीघ्रतावाचपलतामात्सर्यद्वेषरागादयोविभावाः ॥ अनुभावावैरिप्रदर्शनवाक्पा
रुष्यप्रहारादयः ॥ यथालंकाचारिणितिसेतुकारिणिरणक्रीडाचमत्कारिणिप्रोधनंदवच्चः

॥रस०॥ धनु

प्रसारितिणि पुरोरामेषधनुर्धारिणि॥ जातानस्पदशाननस्य समरप्रारंभदंभस्फुरत्केयूरक
णिताः मेघविशिख सागाः करस्त्रेणय॥ चेतः प्रसादो हर्षः प्रियदर्शनपुत्रजननादयो वि
भावाः अनुभावाः पुलकस्वेदाश्रुस्वरभेदादयः॥ यथा पुलकितकुचकुंभपालिराधा व्रजति
मुकुंदमुखेंदुवीक्षणाय॥ विरचयति न मध्यभंगभीतिं गणयति नापि नितंबगौरवं सा॥ आ
कस्मिके [illegible] ष्टानिष्टनिपातविवर्तः॥ संभ्रमो वावेगः॥ वैरिदर्शनप्रियश्रवणादयो विभा
वाः॥ अनुभावास्त्वराशरीरदुस्खलनविपर्यासादयः॥ यथा एकोवासासि विश्लथ सहचरी
स्कंधे द्वितीयः करः पश्चादुत्पतति चक्षुरेकमितरत् सैन्यमुखे भ्राम्यति॥ एकैकं कटकविरुमस्ति च
रणानिर्गंतुमुत्कंठते चान्यद्वैरिमृगीदृशां रघुपतेरालोक्यसेनाचरान्॥ सकलव्यवहाराक्षमज्ञा
नवनाजडता॥ न च मूर्छापस्मारनिद्रास्वप्रतिव्याप्तिः॥ तत्र ज्ञानविरहात्॥ न च आलस्य
भीतित्रासेतिव्याप्तिः तत्र कतिपयस्य व्यवहारस्य सत्वात्॥ इष्टानिष्टदर्शनादयो विभावाः

॥१६॥

॥तरंगिणि॥ ॥१६॥

अनुभावा अनवर[त]भाषणानि निर्निमेषप्रेक्षणे श्वानिश्वासपरिखेदादयः॥ यथादुग्धाब्धा
रिनिधिपारमुदारवीर्यमागच्छतो हनुमतो हसितं वितेनुः॥ उद्वीक्ष्य नीरनिधिनीरमधीर
वीचिं चित्रार्पिता इव पुनः कपयो बभूवुः॥ आत्मनि सर्वाधिकत्वबुद्धिः सर्वास्मिन्नधम
त्वबुद्धिर्वा गर्वः॥ बलैश्वर्याभिजनलावण्यादयो विभावाः॥ अनुभावास्त्ववज्ञाभ्रूविचे
ष्टितहासितपौरुषप्रकाशादयः॥ यथा परशुरामवाक्यं॥ निःपीते कलशोद्भवेन जल
धौ गौरीपतेर्भग्नया हातुं हैतव पुर्ललाटदहने पावकःतः प्रक्रमः॥ तावत्तत्र मयावि
पक्षनगरिनारीदृगंभोरुहद्वंद्वप्रस्रवदश्रुवारिपटलैः सृष्टाः पयोराशयः॥ इष्ट
संशयो निष्टजिज्ञासा वा विषादः॥ इष्टपदं जीवनं धनं यशः शरीरपुत्रकलत्रादयः
विभावाः॥ औ ध्यायं धनगमनादयः॥ अनुभावा उत्तमानां सहायान्वेषणोपायचिंता
दयः॥ [illegible] मध्यमानां विमनस्कताः॥ अधमानां निष्ट ध्यांधारणा मुखशोषनिद्रा

ध्यै

अनुभावाः

पराध ने

रस०२ हस

श्वासादयः ॥ यथा प्रसँयदि व्रजामि भवनं वा चांभ वेश्म च्यवो निर्गछामि निकुंजमेव यदि वाक्को वेद किं स्यादितः ॥ तिष्ठाम्येव यदि क्वचिद्धन तटे किं जातमेतावता मध्ये वर्त्म कलानिधेः समुदयो जातः ॥ किमातन्यतां ॥ औत्सुक्यं कालासहिष्णुता सकलेंद्रियाणामेकदैवक्रियाप्रारंभो वा ॥ प्रियस्मरणादयो विभावाः ॥ अनुभावाः ॥ तंद्रागात्रगौरवादयः ॥ यथा ॥ आद्यः कैरपि केलिकौतुकमनोराज्यैर्द्वितीयः पुनर्वल्लीकेसरचारुचंपकनवांभोजस्रजां गुंफनैः ॥ कांचीकुंडलहारमेखलयन्यासैस्तृतीयस्ततो नीतः सुंदरि वासरस्य चरमो यामः कथं यास्यति ॥ इतरेंद्रियमपहाय मनस्त्वचि यदा वर्त्तते तदा निद्रा ॥ सुखस्य कारणत्वात्सूत्रात्साद्गुः निद्रा भरतेनोक्ता ॥ स्वप्नवहनाडिकायां यदा मनो वर्त्तते तदा स्वप्नादिसंभवः ॥ तत्र विभावाः ॥ स्वभावश्चिंतालस्यक्लमादयः ॥ अनुभावाः ॥ पार्श्वकरणनयनभ्रूचलनविभ्रमवचनस्वप्नदर्शनादयः

॥९७॥

॥तरंगी॥

हे

॥९७॥

गच्छन्न् कुंजं तपनदुहितुः पिच्छगुच्छावतंसः पश्यन्नस्मद्वदनमसकृच्चक्षुषा कुंचि
तेन ॥ स्निग्धापांगशिथिलन्वरणात्स्तोकविस्पष्टहासो दृष्टस्स्वप्ने कमलकलिकामंडनो मे
चखंडः ॥ ग्रहाद्यावेशोपस्मारः ॥ अपाचित्र्यभून्यस्थिति धात्तुवैषम्योल्कटदुःस्वभयादयः
अनुभावाः ॥ कंपफेननिस्स्वासभूपतनविपर्यासजिव्हाल्लालनलालादयः ॥ यथा
उद्वेल्लन्नवपल्लवाधररुचः पर्यस्तशाखाभुजास्फूर्जत्कोरकफेनविंदुपटलव्याकी
र्णदेहश्रियः ॥ भ्राम्यद्भृंगकलापकुंतलजुषश्वासानिलोल्कंपिताश्शैले प्रेक्ष्यकपे
र्निपातितमपस्मारं दधुर्भूरुहः ॥ मूर्च्छाप्यत्रैवांतर्भवति ॥ त्वचमपि विहाय यदा मनः
नाडी पुरीतति वर्त्तते तदा सुप्तं ॥ निद्राविभावः ॥ अनुभावा नेत्रमीलनप्रलापश्वासोच्छ्वा
सादयः ॥ यथा ॥ श्वासोच्छ्वासप्रचलदधरोपांतमामीलिताक्षं क्रीडाकुंजे तपनदुहि
तुः सुप्ततः श्रीमुरारेः अंतः स्मेरं निभृतनिभृतं कापि कर्णावतंसं काचिद्धाव्होःक

॥रस०॥८

नवदलयं रामसुहृत्प्राति ॥ क्वाचित् इंद्रियाणां प्रथमप्रकाशो विबोधः ॥ निद्राच्छेदो वि
भावः ॥ अनुभावा अंगाकृष्टि जृंभाक्षिमर्दनांगुलिमोटनादयः ॥ यथा ॥ राधायाः
सह सा दृशा कुवलयश्रेणीदरिद्रं नभः कुर्वंसा कलकंठकूजनिनदैः सांकेतिके जाग्र
तः अंगाकृष्टिविवर्तमानवपुषो देवस्य कंसद्विषो लोलापांगतरंगभंगचतुरं नेत्रांबु
जं पातु नः ॥ पराहंकारप्रशमोत्करसईहामर्षः ॥ विभावा अवमानाधिक्षेपादयः
अनुभावाः स्वेदशिरःकंपन [illegible] नयत्यादयः ॥ यथा अद्याज्ञानैव भर्तुः सरसिजन
यनासूनुसेनासमेतं बध्वा लांगूलमूले दशमुखमभितो भूतले भ्रामयामः ॥ श्व
मार्गांवलोकप्रचलनयनयासीतयासाकमेनां लंकामुत्पाट्य किंवा रघुपतिचरणां
भोजयोर्योजयामः ॥ आकारव्यवहारसंगोपनमवहित्थं ॥ विभावाः ॥ व्रीडाधार्ष्ट्य
कौटिल्यगौरवादयः ॥ अनुभावाः ॥ अन्यथाकथनमन्यथाप्रेक्षणमन्यथाक

॥१८॥

॥नरंगी॥

नार

॥१८॥

रस०

तरंगी

पनादयः॥ यथा त्यक्त्वा सम्भ्रमं विभीषणं संगतवान्चन्द्रः स पाथोनिधिः किंचित्क्षुभ्यति सोपि
साराशिरनः सीतापतिः सज्यतां॥ इत्याकर्ण्य सुहृज्जनस्य वचनं स्मेराननो रावणो मुक्तादा
मकरेण कंठसविधे कीरस्य चिन्त्यस्यति॥ उग्रता निर्दयता॥ विभावा॥ अपराधदोषकीर्त्त
नचौर्यादयः॥ अनुभावा॥ तर्जनाताडनादयः यथा कोदंडरणभिन्नभूपतिभुजादंडैः
प्रचंडैः कृतं तत्र ज्याप्रतिपक्षराजरमणीवेणीगुणोगुंफिता॥ क्रूराकारकुठारधारय
तनप्रभ्रष्टदुष्टद्विपत्रुट्यद्दंतदलैः कृतास्ति विप्रिरवस्तेद्वत्स्यमुद्दीप्यते॥ यथार्थज्ञा
नंमतिः॥ अत्र विभावाः॥ शास्त्रचिंतादयः॥ अनुभावाः॥ शिष्योपदेशभ्रूक्षेपकरचाल
नचानुर्यादयः॥ यथा लाटीनेत्रपुटीपयोधरतटीक्रीडाकुटीहारस्तटीपाटीरद्रववर्णने
नकविभिर्मूढैर्दिने नीयते॥ गोविंदेति जनार्दनेति जगतीनाथेति कृष्णेति च व्याहा
रैः समयस्तदेकमनसां पुंसां परिक्रामति॥ नयविनयानुनयोपदेशोपालंभात्रैवांतर्भ
व्या

38

चेति ॥ उपदेशो यथा ॥ वसु प्रदेयं खलतो वधेयं मनो निधेयं चरलोहरस्य ॥ निजं विधेयं
कृतिभिर्विधेयं विधेर्विधेयं विधिरेव वेत्ति ॥ उपालंभोपि द्विविधः ॥ प्रत्याख्याका पास्या
च ॥ प्रत्याख्या यथा ॥ पाषाणोयदि मार्दवं यदि पयो धारा हुताशादरे व्यालीनां वद
ने सुधा यदि रवेर्गर्भे हिमानी यदि ॥ स्थेमा किंच समीरणो यदि तदा स्वप्ने न चेतस्तस्य
ता किं नाम स्मर भूमिपाल भगवन्नु क्रोधान्सुधा धावसि ॥ कापास्या मर्षएवोत्तरे भवति
यथा ॥ जनयसि जगदेवं देवदेवा भरणे सुधारसशीतलं सुधांशो ॥ उरसि वहसि मे तथा
पि तापं यदुपति वक्त्र सखासि किं ब्रवीमि ज्वरादिविकारो व्याधिः ॥ कुपितधातु कामकृ
शादयो विभावाः ॥ अनुभावा देहोपद्रवादयः ॥ यथा ॥ दातुं स्वीयमनर्घ्यदीधितिपदं
तस्याः कुरंगीदृशः केयूरं कनकांगुलीयकमिवानेतुं बहिर्गच्छति ॥ अन्यस्त्वत्र ति

॥११॥

॥११॥

वेदयामि किमितो वेणीमिषात्कालियो दृष्ट्वालोचनवारिकालियं सरोभ्रो सापरिभ्रा
म्यति ॥ विनाविचारमाचार उन्मादः ॥ नचागम्यागमनेति व्याप्तिः ॥ विनाविचारमिति
पदेन व्यावर्त्तनात् ॥ तत्रसुखमुद्दिश्यं न दंशे विचारणे वक्रियातसासिद्धिं ने सत्यदेत तत्
अप्रेक्ष्यकारितोन्माद इतियस्य मतं तत्रेदं दूषणं ॥ तत्रविभावाः ॥ प्रियवियोगविभवभ्रंशा
दयः ॥ अनुभावा वृथालपित वृथाहसित वृथारोदनाद्यः ॥ यथा ॥ नेषा कापि चकास्ति कां
चनलता सेवास्ति मेराधिका पृष्टा चेन्न कुतोपि जल्पति तदा संमूर्छिता वर्त्तते ॥ इत्थं हंत
विचिंत्य सिंचति मुहुर्नीरैरधीरैर्दृशो वीतंव्यातनुते करेण भुजयोराधाय संभाषते ॥ प्रा
णनिष्क्रमणं मरणं विभावानुभावौ स्पष्टौ ॥ यथा ॥ पर्यस्तांघ्रिविकीर्णबाहुपतनः संग्रामभू
मौ मियालं केशस्य न केशपाशमलिनस्स्पृष्टुं समाकांक्षति ॥ उद्दंडेनाहं करकंर किरंति वा
वक्षार विरेनवास्वस्वे धान्मिथः कथामपि सुराः प्रव्यक्तमातन्वते ॥ मनोविक्षेपस्त्रास

सं

स्तथाविचारोस्योमनोविक्षोभो भीजिराकस्मिकमनोविक्षोभस्त्रासइति विक्षोभेतौ च द्वयोरे
कत्वेनोपग्रहः॥ तत्रविभावाः घोरस्वनश्रवणघोरसत्वदर्शनादयः॥ अनुभावाः स्तंभस्वर
भेदरोमांचाश्रुपातादयः॥ यथा॥ श्रुत्वानोहरिनामवामवदनादिंद्रस्यशंकावहं नकुर्व
न्कानरमानरंस भगवान् मैनाकभूमीधरः॥ कुंचत्पक्षतिभुग्नितश्रुतिवत्रस्तः लोलाव
तिःसत्वरव्याहृतिसिंधुपंककुहरेनिर्मज्जमाकांक्षति॥ विचारोवितर्कः॥ विभावाः प्रतिपत्ति
संशयसाधकबाधकसमुद्भावादयः॥ अनुभावाः॥ शिरःकंपनाश्रुचलनादयः वितर्क
श्चतुर्विधः॥ विचारात्मासंशयात्माज्ञनध्यवसायात्मापूर्वविप्रतिपत्यात्माचेति अन
ध्यवसायउत्कटकोटिकसंशयः॥ यथा॥ कालिंदीविलुठत्कठोरकमठक्रूरंधनुःशांभवं
रामोबालमृणालकोमलवपुर्वंशोवनेसोभुवः॥ व्याहारप्ररवसः खलाः क्षितिभृतांगो
ष्ठीगरिष्ठाः पुनः स्तस्मात्केवलमेषजिह्रतिममश्रेयस्करोभास्करः॥ यथा॥ वा सौंदर्य

॥२०॥ ॥२०॥

स्य मनो नवेन मणिना रेखा किमेषा कृता लावण्यस्य विलोकितुं त्रिजगतीमेषा किमुद्दी
पिका ॥ आनंदद्रुममंजरी नयनयोः किं वा समुज्जृम्भते राधायाः किमु वा स्वभावसुभ
गा रोमालिरुन्मीलति ॥ यथा वा ॥ कथय कथय केयं खंजनं खेलयंती विहरति यमुनायाः
पाथसि स्वर्णवल्ली अयमुदयति को वा शारदः शीतभानुस्त्वदुपरि तिमिराणामेष को वा वि
वर्तः ॥ यथा ॥ वाईयं नवविलसत्सुधाकरकलाधिकाराधिका कं रंकिरणमालिनः किमु स
हे तत्तस्यां वपुः नवा कनकमंजरी वहति खंजरीटं यतस्ततः स्मरमदालसा कथय केय
मुन्मीलति ॥ ननु दशावस्था स्वभिलाषगुणकथाप्रलापा व्यभिचारिभावान्यंतरेण गणि
तास्तत्किं स्वतंत्राण्येवेति संतीति चेन्न ॥ औत्सुक्ये भिलाषस्य वर्णनात्मकस्मृतौ गुणक
थाया उन्मादे प्रलापस्यांतर्भावात् ॥ अत्र प्रतिभाति छलमधिको व्यभिचारिभाव इति
एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरतस्तांबूलाहरणच्छलेन रभसाश्लेषोपि

रस०॥

॥तरंगी

संविघ्नितः॥ आलापोपि न मिश्रितः परिजनं व्यापारयंत्यानया कांते प्रस्फुपचारतश्चतुर
याकोपः कृतार्थीकृतः॥ तांबूलाहरणच्छलेन रभसाश्लेषोपि संविघ्नित इति शृंगारे दर्श
नात्॥ रौद्रे त्वैंद्रजालादयः हास्ये च व्यपदेशान्यापदेशयोर्दर्शनात्॥ वीथीभेदे गणनाच्च
संगुप्तक्रियासंपादनं छलं॥ विभावाः॥ अवमाननप्रतिपक्षकुचेष्टादयः॥ अनुभावाः॥ व
क्रोक्तिनिभृतवीक्षणप्रकृतिप्रच्छादनादयः॥ शृंगारे यथा संकेतीकृतकाननं प्रविशतोर
न्योन्यकौतूहलादन्योन्यप्रति भानमारचयतोरन्योन्यमुत्रस्यतोः॥ कुंचत्कायमितस्ततः
किसलयैरात्मानमावृण्वतो राधामाधवयोर्निकुंजकुहराद्दृष्टिर्विकापातु वः॥ संग्रामाय
था संतापैः सांन्द्रपटांबुराशीन्पुरोपकंठे पुनरीक्ष्यमाणः॥ दशोकंपीद्रस्य मुखेस
रवेदमायोजयामास खरामचंद्रः॥ सर्वाणि व्यभिचारिस्थलानि विस्तरभिया नोद
हृतानि॥ आलस्यौग्र्यजुगुप्साः संभोगे वर्ज्याः॥ विप्रलंभे आलस्यग्लानिनिर्वे

१२९॥ ॥२९॥

दश्रमशंकानिद्रोत्सुक्यापस्मारसुप्तविबोधोन्मादजाड्यासूयाव्यभिचारिणः॥ हास्ये
वहित्थालस्यसुप्तनिद्राप्रबोधाव्यभिचारिणः॥ करुणेमोहनिर्वेददैन्यजाड्यविषादश्रमाप
स्मारोन्मादव्यथालस्यस्मृतिवेपथुस्तंभस्वरभेदाश्रूणि व्यभिचारिणः॥ रौद्रे उत्साहस्मृ
तिस्वेदावेगामर्षरोमांचकंपचपलतौग्रतास्मरभेदकंपाव्यभि०॥ वीरे उत्साहधृतिमतिगर्वाव
गामर्षोग्ररोमांचाव्यभि०॥ भयानके स्तंभस्वेदगद्गदतारोमांचवैवर्ण्यशंकामोहावेगदैन्य
चापलत्रासापस्मारप्रलयमूर्छाव्यभि०॥ बीभत्से॥ अपस्मारमतिव्याधिमोहावेगवैव
र्ण्यानिव्यभि०॥ अद्भुते स्तंभस्वेदगद्गदताश्रूरोमांचविभ्रमाः व्यभि०॥ अन्येच व्यभिचारि
भावारसानुकूलाः स्वयमूह्याः॥ सर्वाण्यपि नोपिव्यभिचरंतिहासः श्रृंगारे रतिः प्रीतिः॥
शांतकरुणाहास्येषुभयशोकौ करुणे श्रृंगारयोः॥ क्रोधो वीरे जुगुप्साः भयानके उत्सा
हविस्मयौ सर्वरसेषु व्यभिचारिणौ॥ इति श्री भानुदत्तमिश्रविरचितायां रसतरंगिण्यां व्य

क षि

॥रस०॥ भिचारिभावनिरूपणं नाम पंचमस्तरंगः ॥ अथ रसा निरूप्यंते ॥ विभावानुभावास ॥तरंग
त्विकव्यभिचारिभावैरूपनीयमानः ॥ परिपूर्णः स्थायिभावो रस्यमानो रसः ॥ भावविभावा
नुभावव्यभिचारिभावैः ॥ न च पूनोः प्रथमानुरागे ऽव्याप्तिः ॥ पूर्वानुभावभावादिति वा
च्यं ॥ तत्रापि जन्मांतरीयानुभवसत्वादिति ॥ स च रसो द्विविधः ॥ लौकिको सन्निकर्षज
कि न्मा लौकिकः अलौकीसंनिकर्षजन्मा रसो ऽलौकिकः ॥ लौकिकसन्निकर्षः बोढा विषय
गतः ॥ अलौकिकसन्निकर्षो ज्ञानं ॥ तेषु चानुभूयमानेषु ज्ञानमेतत् जन्मानुभूतेष्व
पि तेषु [illegible] प्रागुक्तसंस्कारद्वाराज्ज्ञानमेव प्रत्यासत्तिः ॥ अलौकिकरसस्त्रिधा स्वाप्नि
को मानोरथिक औपनायकश्चेति ॥ औपनायकस्य काव्यपदपदार्थचमत्कारे नाट्ये च
परं तु द्वयोरप्यानंदरूपतानानुमानो रथिको न प्रसिद्ध इति चेन्न स्वप्ने ॥ धन्यानां गिरि ॥२२॥
॥२२॥ कंदरे निवसंतां ज्योतिः परं ध्यायतां आनंदाश्रुलवान्पिबंति शकुनानिशंकमंकेशयाः ॥ अ
स.

स्माकं तु मनोरथैः परिरचितप्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषामायुःप॥
रं क्षीयते॥ इत्यादौ मानोराधिके शृंगारश्रवणात्॥ शास्त्रेषु सकलस्यैव विध्यगण
नाच्च॥ रसेन विना सकलस्यानुत्पत्तेरिति॥ तत्र विशेषाः॥ भरतः॥ शृंगारहास्यक
रुणारौद्रवीरभयानकाः॥ बिभत्साद्भुतसंज्ञौ चेत्यष्टौ रसाः स्मृताः॥ सकलाधि देव
देवतं विष्णुः॥ स च शृंगारस्य देवतं॥ तेन सकलाकांक्षाविषयत्वेनाराध्यतया
च प्रथमं शृंगारोपन्यासः॥ ननु वात्सल्यं लौल्यं भक्तिः॥ कार्पण्यं वा कथं न रसा
स आर्द्रताभिलाषालौल्यस्पृहाणां स्थायीभावानां तत्र सत्वादिति चेत्
न तेषां व्यभिचारीरसाङ्गकत्वात्॥ ननु कस्य रसस्य ते व्यभिचारिभावा
भवेयुरिति चेत्॥ सत्यं॥ वात्सल्यं करुणारसः॥ लौल्यं हास्यः॥ भक्तौ शांतः

रस०

कार्पण्ये वा हास्यः॥ नन्वेवं परत्र करुणस्यादत्र व्यभिचारित्वेनावश्य करुणत्वाद्धर्मिक
त्वेनात्यधुत्वाच्च व्यभिचारिणी रतिरेवास्तु॥ किं करुणेनेति चेत्॥ न रतेः शो
क इति शोककारणतया रतेरुपक्षयात्॥ किं च रतेः करुणरसस्य व्यभिचारित्वं
न शृंगारहास्यरौद्रवीराणां युवमिथुनपरस्परप्रीतिहास्यक्रोधानंदानां तत्राभा
वात्॥ न बीभत्सस्य जुगुप्सायास्तत्राभावात्॥ नाप्यद्भुतस्य॥ तत्र तिष्ठतोपि विस्म
यस्यास्थिरत्वात्॥ तस्माद्धु करुणस्थायित्वया शोकस्थायी भावः करुणाख्योति रि
क्तो रस इति॥ नन्वेवास्तु किं हास्येनेति चेत्॥ स करुणस्यास्तु व्यभिचारी॥ करुणारौ
द्रवीरभयानकबीभत्सानां तत्रानवकाशात्॥ नाप्यद्भुतस्य विस्मयस्य तत्रास्थि
रत्वात्॥ न शृंगारस्य रतेः स्थायीभावात्॥ परं तु रसासह हास्यसांकर्यं न
तु रतिहास्ययोरसंकीर्णस्थानाभावात्॥ पृथक्त्वं कथं स्यादिति चेन्न हेतोर

॥२३॥

तरंग

॥२२

साधारण्यात् ॥ असाधारण्यमत्र स्थायित्वं ॥ यथा रतेः सांकर्येपि स्थायिशोकाद
साधारणकारणात् ॥ करुणोभिधीयते ॥ तथा नत्सांकर्येपि स्थायिहासभावात् साधा
रणकारणात् ॥ हासोभिधीयते ॥ शांतावप्येवमुह्यं ॥ नचैवासत्यादावपि ॥ असाधारणेह
नवत्र आर्द्रतादयः संत्येवेति तथा तेषामपि रसत्वापत्तिरिति वाच्यं ॥ आर्द्रत्वादीनामपि
रतित्वात् ॥ तस्याश्चात्र तत्रासाधारण्ये शृंगाररसत्वापत्तिः ॥ ननूत्साहक्रोधा उभय
त्रतत्समात् वीररौद्रयोरन्यतर एव रसो वर्ततामिति चेन्न ॥ न स्थायीभेदे न भेदात् उत्साह
वासनावीरे न तु रौद्रे ॥ क्रोधवासनारौद्रे न तु वीरे ॥ इत्यत्र मन एव सर्वत्र साक्षीति
यूनोः परस्परं परिपूर्णः प्रमोदः सम्यक् परिपूर्णा रतिर्भावो वा शृंगारः ॥ यूनोरेव त्र प्रमो
दस्य परतेर्वोधिक्ये न्यूनतायां वा व्यतिरेके वा परिपूर्तेरभावात् रसाभास इति ॥ स च द्विविधः
संभोगो विप्रलंभश्चेति ॥ तत्र दर्शनस्पर्शनसंलापादिभिरितरेतरमनुभूयमाने सुखं

ध

48

॥२४०॥ परस्परसंयोगेनोत्पाद्यमान आनंदो वा संभोगः॥ संभोगो बहिरिंद्रियसंबंधः॥ अस्य ॥ तरंगि

देवतं विहृतः॥ वर्णोऽशामः॥ यथा॥ स्तेमे न चाटुवचनानि पराहतानि पाणिः पयोधर

गतो जउतो जगाम॥ लक्ष्म्याः परं तु पृथुवेपथुरेव नीवीं चिस्त्रंसयन्नुसहृदम्मधु

सूदनस्य॥ यथा॥ निद्राणोक्षणमुन्नमय्य वदने कांते कुचोत्स्पृशी स्त्रस्त्रव्यस्त दुकूल

दर्शित वलीप्रव्यक्तनाभिः श्रियः॥ राधापादरघूर्णदुत्पलदलद्रोणीमदद्रोहिभि दृक्का

णस्य तरंगितैर्विरचितो दीर्घो पकारे वस्मरः॥ दशानां समयानां नायकानां नायिकानां च ॥का

भेदेन नायिकानायकयोरवस्था भेदेन शृंगारस्य बहवो भेदा रसमंजर्यां विशेष

तो दर्शिताः॥ इह विस्तरभयान्नोच्यते॥ अथ हावान्निरूप्यंते॥ तत्र भरतः॥ लीला ॥२४

॥२४४॥ विलासो विच्छित्तिविभ्रमः किलकिंचितं मा॥ मोट्टायितं कुट्टमितं विव्वोको ललि

तं तथा॥ विहृतं चेति विज्ञेयो दश हावास्तु योषितां॥ नारीणां शृंगारचेष्टा हावः॥

सच्चस्वभावजो नारीणां ॥ ननु विब्बोको विलाससलाससविछित्तिविभ्रमाः पुरु
षाणामपि संभवंतिइति चेत्सत्यं ॥ तेषां सोपाधिका ॥ स्त्रीणां स्वभावजाः ॥
न न्वेवं सदैव तासां ते कथं न भवंति इति चेत्सत्यं ॥ उद्दीपकान्वयव्यतिरेका
न्यां नायिकानां हावादिर्भवति रो भावइति ॥ लीलाविलासविछित्तिविभ्र
मललितानी शारीराणि मोट्टायितं कुट्टमितं विब्बोक विहृतानि अंतराणि
विभ्रमः किलकिंचितमुभयसंकीर्णं ॥ प्रियवचनभूषणाद्यनुकृतिलीला
अत्र विभावाः ॥ सखीषु कौतुकप्रलापाः ॥ अनुभावाः ॥ प्रियपरिहासाः
॥ यथा ॥ चंडांशौ चरमाद्रिचुंबिनि मनोजिज्ञासितुं सुभ्रुवां न्यं च स्त्री कौतुक

रस ॥२५॥ नरंगि० ॥२५॥

यातयाविरचिते वंशीरवेराधया ॥ एषस्फूर्जतिकृस्पनिस्वनइति क्रोधांधजनू कानने राधांविक्षिपलताप्रतानपिहितांस्मेरोहरिः पातु नः ॥ गमननयनवदनभ्रूप्रभृतीनां यः कश्चिदुत्पद्यते विशेषः स विलासः ॥ विभावाः ॥ प्रियदर्शनस्पर्शनस्मरणादयः ॥ अनुभावाः ॥ अभिलाषवैदग्ध्यप्रकाशनसंकेतप्रतिप्रकटनादयः ॥ यथा ॥ कूजत्कोकिलदरस्फुरद्दुलिनरभ्रूवल्लिवेल्लद्दृक्फवैल्लाकुंडलफालतिसाचिचलितग्रीवं वदंत्या वचः ॥ प्रातर्नर्तितपुंडरीकपरिषत्सांद्रिसपारच्छरी दृष्टिर्यं प्रतिजायते वरतनोर्वक्त्रस्य शक्राधिकः कृत्तिपयभूषणविन्यासो विच्छित्तिः ॥ विभावाः ॥ सौकुमार्यसौंदर्यप्रियरसो

भाग्य गर्वक्रोधप्रकाशादयः ॥ अनुभावाः ॥ गर्वमानकेशप्रकाशादयः ॥ यथा ॥ के
यूरं न करे पदे न कटकं मौलौ न माला पुनः कस्तूरीतिलकं तथापि ततु ते संसारसारश्रि
ये ॥ सर्वाधिकमप्यलंकृतविभालफलकेयद्वेषसारस्मुवोजानीमः किमुतत्रम न्मथ
महीपालेन मुद्राकृता ॥ वागंगभूषणानां स्थानविपर्यासो विभ्रमः ॥ विभावाः धन
मदरागोत्कंठ्यादयः ॥ अनुभावाः ॥ प्रियसख्याक्षेपहासादयः ॥ यथा ॥ स्पर्शे केलि
विधौ निजांशुकधिया पीतांबरस्यांशुके पन्नगायाः परिधाय केलिभवनात्प्राप्तः स्थितायोस्या
बहिः ॥ आदातुं वसनांचलं चपलयन् क्रोपं दृशा दर्शयन् बाला कौतुकमाच न स्मि
तसुधासिक्तो हरिः पातु नः ॥ श्रमाभिलाषगर्वास्मितहर्षभयक्रुधां संकरः ॥ किलकिं
चितं तदाह ॥ श्रमाभिलाषगर्वाणांस्मितहर्षभयक्रुधां ॥ उत्सकसंकरः प्राहे

त

विज्ञेयं किल किंचित्तं ॥ विभावाः ॥ नवयौवनोद्भेदचांचल्यादयः ॥ अनुभावाः ॥ दूतै
व्यानिर्धारणादयः ॥ यथा ॥ कोदंडमारोहति चंडिमानं मध्यव्रतः कांक्षति शोणिमानं
पश्येसुभ्रूधो वर्षति वेपमानं स्वर्णाचलः स्विद्यति किं निदानं ॥ यथा वा ॥ क्रोधागारस
मुत्थिताः समुदयत्संत्रासशैलार्दिताः व्रीडाभिः परिमर्दिताः स्मितसुधाधाराभि
रुद्वर्तिताः ॥ स्नाताः स्नेहरसे मनोभवकलामालाभिराभूषिताः पायासुर्मर्षिशैल
राजदुहितुः स्फीताः कटाक्षच्छटाः ॥ वार्त्तावैमुख्ये सति निभृतत्वं यो दर्शनस्पृहामो
ठायितं ॥ अत्र विभावाः ॥ सपत्नीत्रासलज्जादयः ॥ अनुभावाः ॥ मनःप्रेमकथन

२६ संकेतकथनादयः ॥ यथा ॥ नस्नेहस्य कथा रसं कथमपि श्रोतुं समुत्कंठयते राधा किं २६

तु विकीर्णरत्नकपटादागत्य सौधाद्बहिः ॥ नृत्यन्नेत्रपुटी स्फुरत्तनुचनटी स्वेदो

53

स्तसङ्कोरटीव्यावल्लीनकुटीरस्खलसरिपुनः कुड्ङानिके भ्राम्यति॥ दुःखस्फुरखचे

ष्टाकुट्टमितं॥ विभावाः॥ रागोत्कंठ्यदशनकरजक्षतकुंतलाधरग्रहणादयः॥ अ

नुभावाः कपटकायसंकोचकपटसीत्कारादयः॥ यथा॥ रोद्धुं पाणिः प्रचलति बलादंगु

लीनिश्चलत्वात्सो भ्रूविक्षेपो भवति कुटिलो नेत्रमंतः प्रसन्नं॥ गाढश्लेषे भवति सकलेनो

र्ध्वमात्रेण कारः कैपोमूर्ध्नि प्रसरति मुखं वैमुख्ये न प्रयाति॥ गर्वाभिमानसंभूतोनाद

रात्मको विकारो विब्बोकः॥ विभावाः॥ यौवनमदधनमदकुलमदप्रियापराधादयः

अनुभावाः॥ अवहित्थदुर्वचनदुःप्रेक्षणादयः॥ यथा॥ कलक्वणितमेखले चपलबाल

नेत्रांचलं प्रसन्नमुखमंडलं श्रवणसंचरत्कुंडलं॥ स्फुरत्सुलकबंधुरं लपितशोभमानाना

धरं विहस्य कमलेक्षणा व्रजति कामकेलिगृहं॥ प्रियसन्निधावभिलाषापरिपूर्तिविहतं

व्याजलज्जादिस्योविभावाः॥ अनुभावाः॥ अन्यथाचेष्टितान्यथाव्यवहारादयः॥ व्याजाद्यथा॥

54

॥रस०

अभिलषति कपोले चंद्रचूडे विधातुं तिलकमुदयदंतः कोपभाजा भवानी॥ फणिपति

नयकूटादंगमुल्लंघयंत्या प्रचलवसनवाले वीक्षिता केलिदीपाः॥ लज्जातो यथा

अनंदभाजो यदुनंदनस्य करावरोधं न करेण कुर्याः॥ सखीं लपंति मितिसंजयानन्व

कोरनेत्रांचुलकोदकेन॥ यूनोरन्योन्यमुदितानां पंचेंद्रियाणां संबंधाभावो भीष्टाप्रा

प्तिर्वा विप्रलंभः॥ न मानात्मके विप्रलंभे व्याप्तिः॥ मुदितपंचेंद्रियसंबंधाभावरूप

स्य विशिष्टाभावस्य तत्रापि सत्वात्॥ तदानीं यूनोरिंद्रियाणां मुदितत्वाभावात्॥ ननु यो

प्रियं अभिसर्तुं गच्छति सा विप्रयुक्ता भवेदिति चेत्सत्यं॥ सा विप्रयुक्तैव अचि

रदर्शनप्रत्याशानुबद्ध प्रमोदेन विरहधर्मस्याश्रुपातादेरसंभवइति॥ सच

विप्रलंभः पंचधा॥ देशांतरगमनाद्गुरुनिदेशादभिलाषादीर्षातः शापाच्चेति

णो।

॥२७॥

तरंगि

॥२७॥

समयादेवाद्दिग्नहीद्दिसादयोप्युन्नेयाः॥ दशोन्तरगमनं यथा॥ प्रस्थानायकृतो
धमोपि पतमेदाः कंकणेन च्युतं धैर्येण स्खलितं मदनगलितं नेत्रांभसा निसृ
तं॥ जीवेनापिप्रियास्कृनाशिवाशिव प्रारंभिवामभ्रुमः कंपांदोलितकिंकिणीकल
रवव्याजेन दैन्यस्मृतिः॥ यथावांतानचरणानां वीणामंकेकथमपिसखीप्रार्थ
नाभिर्निधायस्वैरंस्वैरंसरसिजदृशागातुमारब्धमेव॥ तंत्रीवुध्याकिमपिविरह
क्षीणदीनांगवल्लीमेनामेवेस्पृशतिवहुशामूर्छनाचित्रमेतत्॥ गुरुनिंदशनो यथा
नास्वांस्तूततनरगुरुर्मनसिजः कोप्यषमंगस्तमोमंदोगंधवहः सितोमलय
जोदोषाकरोमाधवः॥ अंगारोनवपल्लवाः परभृतोविझोगुरोराज्ञयानिर्यातोसि
विचारिताः कथमपिक्रूरास्त्वया न गृहाः॥ अभिलाषात् यथा॥ आगाराभिमुखे

॥२स०॥ मुखं रचयतोर्वक्रीकृतग्रीवयोर्व्यस्तं चोत्तमजानतोः क्वचिदपि व्यासुनः स्ति ॥तरंगि०॥
वृत्तोः॥ मार्गविस्मरतोः क्वचित्क्वचिदपि सच्छाक्षरं जल्पतोः साचिप्रेक्षितमा
वयोर्यदभवद्भूयस्तदाशास्महे॥ ईर्षा-तो यथा॥ प्राणेशस्य प्रभवति मनः प्रेमहे
म प्रसूने चेतो नूनं दृगपि कमलं जीवनं बंधुजीवं॥ आशासूत्रे ग्रथितमखिलं वै
धस्मात्तस्य भंगे स्यादेतेषां मपि नियतं चेद्धिमानं विमुंच॥ शापाद्यथा॥ अनन्वय
दिनिर्गंतुमिच्छा निर्गच्छदूरतः॥ प्रियाविरहतापेन शापदग्धो भविष्यसि॥ लम्पाद्य
था॥ विश्लेषजीवनश्रीः उपीडाविधुरमानसा॥ लस्थौ प्रातः प्रियं प्रेक्ष्य चक्रीव चक्री
कृतानना॥ दैवाद्यथा॥ जीवने सति विश्लेषो विश्लेषे सति जीवनं॥ द्वयोरप्यनयोयू ॥२८॥
॥२८॥ नामहमेव निदर्शनं॥ विरहाद्यथा॥ केलिगृहे वा मणिमंदिरे वा शशाम लंकान गरेहुताशः॥

इनस्तत: प्रास्थितयोर्नेपूनोर्वियोगजन्मा विरराम वन्हि: ॥ इतिश्रीमद्भानुदत्तमिश्रविर
चितायां रसतरंगिण्यां षष्ठमस्तरंग ॥ ६ ॥ ६॥ ६॥ ६॥ ६॥ ६॥ ६॥ ६
हासस्य परिपोषो हास्य: स च द्विविध: स्वनिष्ठ परनिष्ठश्चेति ॥ तावप्युत्तममध्यमाध
मभेदात्रियेति षड्विध: ॥ स्वनिष्ठोपरनिष्ठोपि द्वादशभेदो हास्य: ॥ तथाच उत्तमानां स्व
निष्ठपरनिष्ठे चास्मितहसिते ॥ मध्यमानां स्वनिष्ठपरनिष्ठे विहसितोपहसिते ॥ अधमा
नां स्वनिष्ठपरनिष्ठे चापहसितातिहसिते ॥ उत्तमानां ॥ मीषद्विकासितकपोलमव्यक्तदशन
मपांगस्फुट्टवीक्षितास्मितं स्वनिष्ठं ॥ परं चाविकासितकपोलमुत्फुल्लानन मीषद्दर्शितदश
नहसितं स्वनिष्ठं परनिष्ठं चेति ॥ मध्यमानां समयोचितमुत्तमस्वनमाकुंचितमुख
माविर्भूतवदनरागविहसितं स्वनिष्ठं परनिष्ठं च उत्फुल्लनासापुटं कुटिलदृष्टिवीक्षि

॥२१स०॥ तरंगि

तंकुंचितमुत्तमस्वनमाकुंचितग्रीवंस्फुरत्स्वनमुपहसितंस्वनिष्ठपरनिष्ठंच॥ अधमाना
मुद्गतमुपदस्त्रुकंपितमौलिस्फुरत्तरस्वनमुपहसितंस्वनिष्ठंपरनिष्ठंच॥ अस्रुद्रुतमति
बहुलाश्रुस्फुरत्तमस्वनमनिष्ठपार्श्वेजनारब्धकूरतालहसितं॥ स्वनिष्ठंस्मितंयथा॥
लेखनीभिनतद्रुनोविचिंतयन्कुत्रकुत्रनजगामपद्मभूः॥ तांपुनः॥ श्रवणसीम्नियोजितं
प्राप्यसंनतमुखःस्मितंदधौ॥१॥ स्वनिष्ठहसितंयथा॥ व्योमांकुरंव्योमरतेरदाग्नमुग्धयु
तंस्वीयमुदीक्ष्यविहस्य॥ यदासहास्यंकिमुतत्तयोधावच्चापिफेनस्तबकायमाने॥ परनिष्ठ
हसितंयथा॥ हरवृषभमुखेससखेलमायोजयतिस्फवर्णकांतिपर्णी॥ भुजगपतेःशिशुःघ
उरस्पः॥ कलयतिकज्जलमंतिकेभवान्याः॥ परनिष्ठंविहसितंयथा॥ निशासुतैलस्पर्धीयाग
ह्रीतैर्मषीजलोल्लिप्तमुखारविंदं॥ गोपंप्रभातेस्खलदश्रुनीरमधीरनादंजहसुस्तरुण्यः ॥२९

॥२९॥

उपहसितंपरनिष्ठंयथा॥ योनिःसेधामयारब्धइतिपद्यंन्पठन्द्विजः॥ शश्वद्दुःकुलेनास्तेन
नटस्त्रेणोपहस्यते॥ अपहसितंपरनिष्ठंयथा॥ स्नातस्येवकलभयज्ञसूत्रेकंठावलग्नंपरि
मोचयंति॥ द्विजांगनादीर्घतरंहसंतितारस्वरंवारवधूर्जहास॥ अतिहसितंपरनिष्ठं
यथा॥ चोरःकामपियोगगृहंनीत्वागतःशूलंकपालेहरन्बीजंधूर्तफलस्यतंदुलधिया
नीलापुनर्मुक्तवान्॥ व्यावल्गस्वचलन्स्खलन्नूपरिपतन्मुहुर्न्वीघूर्णन्विशन्चैउ
द्धध्वनिमुक्तमौलिकुसुमंसर्ववेश्ययाहस्यते शोकस्यपरिपोषः॥ आशाविच्छेदेसतिसर्वेंद्रि
यक्लमोवाकरुणः॥ नचविप्रलंभेतिव्याप्तिः॥ तत्रेष्टाशायाःसत्वात्॥ तद्विच्छेदेतुस
चविप्रलंभःकरुणएव॥ शोकोदुःखं॥ वर्णोस्यकपोतश्चित्रितः॥ देवतंवरुणः सच
स्वनिष्ठपरनिष्ठश्च॥ स्वशापबंधनक्लेशनिष्ठैर्विभावैः स्वनिष्ठः॥ परेष्टनाशशापबंधन
क्लेशादीनांदर्शनश्रवणस्मरणैर्विभावैः॥ परनिष्ठः॥ स्वनिष्ठोयथा॥ तवनाथशरः

॥रस०॥

शरासनेन तव देहेन सहैव भस्मसात्॥ अहमस्मित्ततः प्रतीयते तव नास्मीति किमुच्यतामितः

परं निश्चयो यथा॥ अनुवनमनुयान्तं बाष्पवारिस्रजं तं मृदितकमलदाम क्षाममालोक्य रामं।

दिनमपि रविरोचिस्तापमन्तः प्रसूते रजनिरपि च धत्ते तारका बाष्पबिंदून्॥ परिपूर्णः क्रोधो

रौद्रः सर्वेंद्रियाणामौद्धत्यं वा॥ वर्णोऽस्य रक्तः॥ दैवतं रुद्रः॥ यथा॥ चेडास्तु किं तु चक्रे भुजग

पतिरसौ वर्तते किं तु पाशः कुंताः किं दंति दंतान च गिरिरशनिः किं नशस्त्रैः किमन्यैः॥ भीमो

हं दुष्टदुर्योधननिधनसमुद्दंडबाहुप्रकांडः॥ प्रासावतप्रकोपप्रलय हुतवहो नास्मि कस्या

पि वश्यः॥ यथा वा॥ क्रीडन्तुंगतरंगदापपटलीखर्वीकृतो वीधरश्रेणी स्फूर्जितधूलिधोर

णित मस्तोमावलीप्ये जगत्॥ ब्रह्मस्पर्द्धकरीं द्रवृंदचरणाच्या भग्नभोगीश्वरे व्यग्रोदग्रफणा

गरलरुचिरैर्भैः विद्योतयामो वयं॥ परिपूर्ण उत्साहः॥ सर्वेंद्रियप्रहर्षो वा वीरः॥ वर्णोऽस्य गौ

रः॥ दैवतं शक्रः॥ स च त्रिधा॥ युद्धवीरदानवीरदयावीरभेदात्॥ इयांस्तु विशेषः॥

॥३०॥

सच्चोत्साहो युद्धवीरे प्रतापाध्यवसायादिप्रभवः ॥ दानवीरे दानसामर्थ्यादिप्रभवः द
यावीरे आर्द्रतादिप्रभवः ॥ युद्धवीरो यथा ॥ संग्रामांगणमागतेन दशमुखे सौमित्रिणा विस्मि
ते सुग्रीवेण विचिंतिते हनुमता व्यालोलमालोकितं श्रीरामेण परंतु पीनपुलकस्फूर्जत्क
पोलः श्रीयासांद्रानंदरसालसानि दधिरे बाणासने दृष्टयः ॥ दानवीरो यथा ॥ अभ्यागच्छ
ति मंदिरं द्विजकुले खंडांबुधिं क्षाराब्धिं लवणाय दुग्धजलधिं दुग्धाय चेद्वांछति ॥ दुर्वा
रो विरहो भवेदिति धियादीनैव दिव्यायगायस्यांघ्रिं न जहाति विप्रवपुषे रामा ॥ यत
स्मै नमः ॥ दयावीरो यथा ॥ दयाबीजं हरेर्नेत्रमंकुरस्तस्य भास्करः ॥ ततः समुत्थिता
वेतौ पल्लवौ रामलक्ष्मणौ ॥ भयस्य परिपोषः सर्वेंद्रियक्षोभो वा भयानकः वर्णो
स्य श्यामः दैवतं यमः ॥ सत्त्वस्य निक्षः ॥ परनिष्ठो वा ॥ स्वापराधात्स्व निक्षः ॥ यथा ॥ गो
पीक्षीरघटीविलुंठनविधिव्यापारवार्ताविदः पित्रोस्त्रासनशंकया शिशुवपुर्देवः

॥२स॥

प्रकाश्यज्वरं॥ रोमांचंरचयन्दृशौमुकुलयन्प्रसंगमुल्कंपयन्सीलुर्वन्तमसिप्रसर्पति
रहंसायंसमागच्छति॥ परानिष्ठायथा॥ गंगायाः सलिलेनिमज्ज्यनिजटाजूटपरिभ्रा
म्यति भस्यसाक्षिरुनाशनेफणिफणाभोगे च्कचिल्लिपते॥ कुंजीभूयहरस्यकर्णसं
बीरं निर्गत्य मर्त्कंटतेराहोरास्यमुदीक्ष्यकिंनकरतेबालस्तुषारद्युतिः॥ विकृतनि
नदासरनिष्ठायथा॥ कुर्वाणेदशभिर्मुखैर्दशमुखेनादंसकरै कंपितेदिङ्नागैस्त्वकित
रवैरपिहयेस्तुच्छमाधावित॥ सुग्रीवस्सुसमुच्छलज्जलनिधिव्यालोलवी वि
भ्रमीभ्रस्यसंतुविशंकयाहनुमतोवक्त्रेदृशौसंदधे॥ जुगुप्सायाः परिपोषोविभ
त्सः सर्वेन्द्रियसंकोचोवा॥ वर्णास्यनीलः॥ सच्चस्वनिष्ठः परनिष्ठः श्चेति॥ स्वनि
ष्ठायथा॥ कालीकुंडलिनीकुतूहलमियः प्रारब्धयुस्थाकृतिन्यंचद्वीचिवलद्धि
हायसिचलज्ज्ञिलहीनियानस्पृशी॥ बद्धुस्यर्द्धुविपक्षपक्षरुधिरस्त्रोतस्वनीस्त्रो

॥३१॥

॥३१॥

63

तसी भस्मसमुद्रमती स्खलत्सपरशुक्रोधाकुलो भार्गवः॥ परानिष्ठो यथा॥ छत्रं कुंभी
द्र कर्णौ विरचयतनुतां चामरं वाजिपुच्छे मौलौ मुंडैः प्रचंडैस्रज गजजघनैर्मेरु पयो
जयस्य श्रोत्रे नीराजनायाः कलयविधिमिति प्रेनदग्धांगनानामालापः कुंडलिन्या
स्तनयपरिणयारंभजन्मा बभूव॥ विस्मयस्य सम्यक् वक्तुर् अद्भुतः॥ सर्वेंद्रियाणां
तारसहवा॥ वर्णास्यपीतः देवतं ब्रह्मा॥ स्वनिष्ठः परनिष्ठश्च॥ स्वनिष्ठो यथा
लीलानिबद्ध पाथोधिं हेलाहतदशाननं॥ स रामः सीतयाश्लिष्टमासानं बद्ध
मन्यत॥ परनिष्ठो यथा॥ सत्क्रा जीर्णदुकूलबद्धस मती बद्धे बुधिर्बिंदु व ढाणाग्र
णरजलकपोत इव स व्यापादितो रावणः॥ लंकाकापि बिभीषणाय सहसा मुद्रे व हस्ता
र्पिता ■ श्रुत्वैवं रघुनंदनस्य चरितं को वा न रोमांचति॥ असुक्तिप्रभोक्ति चित्रो
क्ति विरोधाभासप्रभवत्वे अद्भुत एव॥ असुक्तिर्यथा॥ भूपादेषस्सतां हितायभग

॥रस०॥

न

वान् कोलावतारो हरिः सिंधोः क्लेशमथास्य यस्य दशौ प्रांते स्थितायां भुवः नाराहार

तिवारिदृस्तिलकतिसर्वाहिनी मात्यतिक्रीडादर्पणतिस्सपापतिरहरैव स्वतारंकृति

पथ्यावा॥ दिव्य हरे मुखकुहरे विस्तीर्णपर्णतिव्योम॥ चूर्णति चंद्रः केमुकुतिक नकगिरिः

खदिरसारतिखरांशुः॥ भ्रमोक्तिर्यथा॥ तीव्रैस्तिग्मरुचः करैः परिचितांसतुंककपोल

स्थलीनीराणां निकरंकरेण हरमातुष्षीकृतेवारिधौ॥ मैनाकंसमुद्दीक्ष्य पंकपतितं

शालूकशंकान्मुषो हेरंबस्य पुनातु दंतशिखरव्यौरलीलारसः॥ अंतः क्रोधाग्नि

जाग्रत्कपटनरहरिः स्फारनिश्वासवातव्याधूतावारिवाहाकुलधराणिभृतः

सानुषु प्रस्खलंतः॥ दिग्नागे र्नागबुद्ध्या वनहरिणकुलैः शंकयाशार्दूलानांछाया

व्यांसाकिरातैः छिन्नवसनधियावीक्षिता सर्वधूमिः॥ चित्रोक्तिर्यथा॥ गिरिर्वमति

गतरंगि०

पा

३२

३२

65

मौक्तिकावलिमल्लिहृयंस्यच्छावरंशरनुहिनदीधितिर्व्यंजनमारुतवोध्वुति॥ धनु
स्वपतिमन्मथं शिथिलबंधनं उत मोनमो मनसिजाय ते चिरमपि कौतुकं तन्वं मे
लाससणिमुरखिलं चित्रोक्तिरेव॥ विरोधाभासो यथा॥ कोप्यसौ नवमुकुंद नंदको भ
वति कंससंपदः॥ कुंडलिहृमसि कालियं कुतो दूरतो नयासि तन्निवेदय॥ नाद्योच
सर्वरसा आनंदरूपा अद्भुतारव्याः परनिष्ठ एवेति॥ चित्तवृत्तिर्द्विविधा॥ प्रवृत्तिर्निवृत्ति
श्च॥ निवृत्तो यथा शांतिरस यथा प्रतीमायारसइति प्रतिभाति॥ एकत्र रसो हि तिरन्यत्र
नेति वक्तुमशक्यत्वात्॥ नच सारातिरेव॥ सकस्यास्तु व्यभिचारी॥ न शृंगारस्य तद्वैरि
णो विभत्सस्यापि तत्र सत्वात्तत एव न विभत्सस्यापि॥ न हासस्य तद्वैरिणः करुणस्या
पि तत्र सत्वात्॥ अत एव न करुणस्यापि॥ न रौद्रस्य तद्वैरिणोद्भुतस्यापि सत्वात्
अत एव नाद्भुतस्यापि॥ न वीरस्य॥ न द्वैरिणो भयानकस्यापि तत्र सत्वात्॥

कं

॥२०॥ अत एव भयानकस्यापि ॥ नापि शांतस्य ॥ तद्विरोधात् ॥ न च सामान्य एव तद्विशेषा इ ॥३०॥
तरे भवंति ॥ तर्हि रसाभासस्यापत्तेः किंतु विद्युत इव रतिहासशोकक्रोधोत्साहभयजु
गुप्सास्तत्रोत्पद्यंते विलीयंते च ॥ तेन तत्र ते व्यभिचारीभावा इति ॥ लक्षणं च ॥ प्रबुद्ध
मिथ्याज्ञानवासनामायारसः मिथ्याज्ञानमस्य स्थायिभावः ॥ विभावाः सांसारिक
भोगार्जकधर्माधर्मौ ॥ अनुभावाः पुत्रकलत्रविजयसाम्राज्यादयः ॥ यथा ॥ वाटी
लाटीदंगभोररहरंभसकरी वापिका कापि कांतिनल्पे चंद्राश्मकल्पं प्रकटयति मि
थः कामिनीकामिनीनां ॥ रूपं कामानुरूपं मणिमयभवनं बंधुरं बंधुरागो लोके लोके
शाकस्य त्वमसि न भवने सर्वदा सर्वदाता ॥ नाप्यभिन्नस्थले निर्वेदस्थायिभावः ॥ शां
॥३३॥ तोपि नमोरसः इति ॥ निर्वेदपरिपोषः शांतो रसः ॥ दोषप्रशमो वा ॥ दोषाः कामक्रोधा ॥३२॥
दयः ॥ अस्य विषयदोषविचार्यविरक्त्यादयो विभावाः ॥ अनुभावाः ॥ आनंदास्फ

पुलकहर्षगद्गदवचनादयः॥ यथा॥ इयंहर्म्यमिदंनिकुंजभवनंचेयंप्रदेयंधनंपेयं
तीर्थपयोहरेर्भगवतोगेयंपदंभारहं॥ नेयंजन्मचिरायदर्भशयनेधर्मेनिधेयंमनः
स्थेयंनत्रस्खिन्नागसिनस्यसविधेध्येयंपुराणमहः॥ वेदस्याध्ययनंकृतंपरिचितंशा
स्त्रंपुराणंश्रुतंसर्वंव्यर्थमिदंपदंनकमलाकांतस्यचेत्कीर्तितं॥ उत्खातंसदृशीकृतं
विरचितःसेकोम्भसाभूयसासर्वंनिष्फलमालवालनिलयेक्षितेनवीजयदि॥ इतिश्री
भानुदत्तविरचितायांरसतरंगिण्यांसप्तमस्तरंगः॥ स्थायिभावदृष्टिरष्टधा॥ स्निग्धाहृ
ष्टादीनाक्रुद्धादृप्ताभीताजुगुप्सिता॥ विस्मितान्चेति॥ व्यभिचारिभावजादृष्टिर्विं
शतिधा॥ रहन्यामलिनाशांतालज्जिताशंकितामुकुलाअर्द्धलग्नाजिह्माकुंचि
ताविनर्किताअभितप्ताविषण्णाललिताकेकराविशोकाविभ्रांताविप्लुताअत्रस्ता
मदिराचेति॥ रसभेदादष्टधारसदृष्टिः॥ कांताहास्याकरुणारौद्रावीराभयान

॥ना०रं॥

कावीभत्साऽद्भुताचेतिषट्त्रिंशद्दृष्टयः॥कुणिताविकसिताचकितासृता

॥रस०॥ घूर्णिताअलसाविवर्जिताअर्द्धविवर्तिताआनर्तिताअर्द्धनर्तितापर्यस्तामिताचे

सादयोदृष्टिभेदानुहनीयाः॥ललितायथा॥मनसिजनृपतिर्वामंडनेवामदोवाशशि

मुखिभवनेवायौवनेवावयोवा॥अखिलमपिकृतार्थंवाचिविक्षेपखेलत्कमल

शा५ विजयलीलालालितालोचनेन॥म्लानायथा॥पर्यस्तालकरोचिषाश्रमजुषःप्राखिन्न

गंडस्थिषःशमोशीकरशीतलैनशशिनावानंतसमानन्वति॥जीयास्तामचलाधिरा

जदुहितुर्निस्पंदनीलोत्पलच्छायानिद्रितचंचरीकमिथुनस्पर्द्धासमृद्धेदृशौ॥एव

मन्याअप्युदाहरणीयाः॥अथरसानांजन्यजनकभावः॥तत्रभरतः॥शृंगारा ॥३६॥

नुभवेद्धास्योरौद्राच्चकरुणोरसः॥वीरात्स्याद्दद्भुतोत्पत्तिर्बीभत्साद्भयानकः॥

॥३४॥ अयमुत्सर्गः॥परेषामपिरसानांकार्यकारणभावदर्शनान्॥पूर्वग्रंथकारसंमतिरपि॥

कथानुग्रहयोगाच्च विवक्षावशातः कवेः॥ अन्योन्यजन्यजनकारसभावा भवंति समि॥
यथा॥ मातुर्द्दृष्ट्वा दृगंभोरुहयुगलल्लसद्बाष्पधारामुदारां॥ तातस्य प्रेक्ष्य वक्षःस्थ
लरुधिरचयं क्रुध्यता भार्गवेण॥ हस्तेन्यस्तसहस्रार्जुनमदनसमारंभगंभीरः वी
र्यः स्फूर्जद्दोर्वल्लिहल्लीसकरसकलकालासूत्रधारः कुठारः॥ अत्र वीरं प्रति करुण
विभत्सयोः कारणता॥ यथावा तातचरणानां॥ कुरंगाक्ष्या वेणीसंभंगविपरीतरति
विश्रांतिविधिस्कंदद्दत्ता किमपि नियतं तामिरमिठः॥ अधिगिरिचंपुष्पस्य चलकरवा
लव्यतिकरं स्मरन्नेवं सद्योविरमति परीरंभरभसात्॥ अत्र भयानकं प्रति शृंगारस्य
कारणता यथावा॥ युधिकुपितकृतांतस्यंदनस्पर्द्धिनादं दिशि दिशि दशकंठस्सतेचा
नूवारिदास्त्रं॥ तडितजनकपुत्र्याः साम्यमालोकमानस्सृजति न पवनास्त्रं राघ
वः खिन्नपाणिः॥ अथ शृंगारं प्रति वीरस्य कारणता॥ एतेषामंगांगिभावापन्नाना

रससंकर इति लोकालपंक्ति ॥ रसानां मिथो विरोधोपि ॥ तत्र भरतः ॥ शृंगारबीभत्स
रसौ तथा वीरभयानकौ ॥ रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥ वैरिरसस्य वैरि
रसस्य विभावानुभावव्यभिचारीभावा अपि रसहानिकरा इति तानपि वारयेत् ॥ तत्र
प्राचीनसंमतिः ॥ न च वैरिरसं ब्रूयात् वैरिणां नापि भावकं ॥ न विभावं सञ्चारिभा
वं न वै कदाचन ॥ किं त्वंगांगिभावो नापन्नयोरेकदैकदेशे सति वैरं देशभेदे सति
न वैरं ॥ वक्ष्ये कृपि संयोगान् द्वभावयोरिव ॥ समयभेदे सत्यपि न वैरं भूतलेघट भेद
भावयोरिव वैरं यथा ॥ प्रियेणालिंग्यमानायाः प्रियायाः कुचकुंभयोः करजक्षत
निर्मुक्तरुधिरं कुंकुमायते ॥ देशभेदे सति विरोधाभावो यथा ॥ एकः सिंधुभवः
करविस्फुलिंगस्य केद्वितीयोस्थितः कामध्वंसिनि कालकूटकवलक्लिष्टत्रिपोधत
ती ॥२५

स

नृप: क्षीरनिषेर्द्धनप्रमथनैक्तश्चतुर्थस्तथापायास्फ: कमलापतेर्भगवतोनानार
सा: पाणय: ॥ अत्र शृंगाररौद्रकरुणाद्भुतरसानां विरोधाभाव: ॥ समयभेदेन यथा
रूष्ठं कामरिपोर्धनु: परिहृतं राज्यं परिच्छितं काननेनिर्भिन्ना ह्निशिरा: खरस्यपिशितं स्व
स्व कपिलालित: ॥ लंकेशादलितांश्चिरायरुदितं लंकावधूनांश्रुतं नीता सम्प्रावि दे
ह भुस्तदखिलं रामस्यलोकोत्तरं ॥ अत्राद्भुतशांतभयानकरौद्रबीभत्सहास्यवीरक
रुणाश्रृंगाराणां विरोधाभाव: ॥ अंगांगिभावापन्नानां रसानां येकत्रसमावेशो यत्र
म सरसंशाबलइतिनव्यं ॥ तस्याप्यनंतदेवोदाहरणं ॥ अंगयोर्वैरिणनरसाहानि:
भटयोर्वैरेप्रभोरिव ॥ यथा ॥ श्लो ॥ तां संस्मर्य वीचीप्रचलकुवलयस्पर्द्धिचक्षु: क्षिपं
तीं सेनां स्वं वीक्ष्य परक्ष: शरदलितवपु: शोणितासारसिक्तं ॥ रामेण क्रोधदर्पद
शामुखनिपतन्मुंडलाभप्रमोदात्क्रीडल्का ॥ लीकरालभ्रुकुटिसहचरीसंदधे चापयष्टिं

॥२५०॥

शृंगारबीभत्सयोर्विरोधेपिनरसहानिः॥ एवमंगांगिभावापन्नयोर्विरोधिनोरत्र
त्रभावेपिनरसहानिः॥ यथा॥ भोगिगमंगीरिमयंजलाद्यात्मकेऽचशाङ्ग्यइवमुमुचे
दशकंधरेण॥ सर्वविदेहतनयाविरहाकुलेनरामेणवह्निमयमस्त्रमिवव्यलोकि॥
ननुबीभत्सशृंगारयोः सहजंवैरंकुतः॥ मधुनिः पीयनिष्ठिवतोः संभोगदर्शनाद्धि
तिचेत्सत्यं॥ बीभत्सस्यजुगुप्सास्थाइभावः॥ साचतद्दर्शनेनतरस्थस्यभवति॥
ननुतयोः रागोत्कट्यादिति॥ ननुतथापिबीभत्सेशृंगारोदृश्यते॥ तथाहि॥ यदपि
हृदिविशालामुंडमालानपाणिस्सजतिनरकपालेरौरवेचर्मचेलं॥ तदपिगिरिसु
तायाः पक्षपातः पुरारौसमुदयतिविचित्रः कामिनोः प्रेमबंधः॥ इत्याशंक्यविचिन्त्य
तसत्यं॥ निजभर्तुरधमेपिभूषणा... तिशयेनपत्न्यास्तत्रजुगुप्सेवनावतरति॥

॥२५६॥

॥२५६॥

73

जुगुप्सितत्वेप्रतीयमानमेवजुगुप्सोत्पादकं भवति॥ किंचाप्रियसंबंधोवाधिकम
धिकं तत्रप्रेमोत्पद्यते॥ तस्मात्स्थाई भावाभावाद्धि नेत्सरस्तत्र नजायतइति॥ ननु
वीरस्ययुधिगच्छतः॥ सर्पस्पर्शेचकिततारौद्रेचाकस्मिकोत्पातानिपातेविस्मयइति॥
चेत्सत्यं चकितताविस्मयश्चतत्रतत्ररसावेशात् न भवत्येव॥ सतिवाविषयभेदः॥
वीरस्यनप्रतिभटाद्भयं भवतिकिंतुभुजगात्॥ रौद्रेचप्रतिबलंबलाद्धिकादौ किं
तूत्पातेविस्मयइति॥ सर्वेरस्योत्पादकमखिलमवध्येयं॥ तत्रपूर्वाचार्याः॥ अन्य
त्ररसवैरस्योत्पादकवचनेतथा॥ नवाच्यंरसभावज्ञैर्नाट्यशास्त्रविशारदैः वचन
मित्युपलक्षणं॥ एवंविभानुभावेष्वपिद्रष्टव्यं॥ क्वाहंक्वत्वं कमधुसमयः कुत्रवा
दूतिकासौमेघच्छायाप्रतिचलमिदं कुत्रवाप्रेमयूनोः॥ आयुर्वायुप्रचलनलिनी
वारिबिंदूपमानंमानंमुग्धेविसृजसकलंपृष्ठमेवप्रलीनाः॥ अत्रनिर्वेदप्रतिपादक

॥तरंगि०

मखिलं ॥ तच्छृंगारविरोधि ॥ अनौचित्यं च सर्वथा विधेयं ॥ तत्र प्राचीनग्रंथकृतः

॥रस०॥ अनौचित्यादृते नान्यद्रसभंगस्य कारणं ॥ प्रसिद्धौचित्यबंधस्तु रसहर्षाय जायते ॥

उद्वेगकरमनौचित्यं ॥ लोकयात्राप्रसिद्धिसिद्धमौचित्यं ॥ तस्माद्द्वयोर्यूनोः यत्र मिथो

रतिस्तत्रैव रसः ॥ एकस्यैव रतिश्चेद्रसाभास एव ॥ क्रमेणोदाहरणं ॥ सीतासमागम

श्लाघ्या बंधुरं दशकंधरं प्रहर्तास्मि मत्तकामो रामो वा निशितैः शरैः ॥ अत्र रावणैव स्ये

रतिर्न तु सीतायाः ॥ तथा ॥ निधुवनवनप्रांते यांते चलैः किमिति वलितग्रीवं मुग्धे मु

हुर्मुहुरीक्षसे ॥ विफलमखिलयूनोर्नो चेदुदेति परस्परं रतिरथ मनोजन्मा देवः स

एवं निषिद्धानां ॥ अत्र नायिकाया एव रतिर्न तु नायकस्य ॥ एवमेकस्यानेकविषया रतिः ॥३७॥

॥२७॥ रसाभासः ॥ तथा सति कुलस्य सत्कुलोत्तमनायकस्य बहुकामिनीविषयायाः रतेः

रसाभासत्वापत्तेः दक्षिणनायकस्याभासापत्तेः ॥ तस्माद्व्यवस्थितबहुका

रसाभास एव ॥ परं लेषा एव विशेषः ॥ यस्याश्च यथा व्यवस्थिता बद्ध्या भवंति तत्र न रसा[illegible]

नायिका—

मिनीविषयकवैशिकनायकपरमेतत्॥ अतएववैशिकानांवेश्यानांचरसाभासइ
तिप्राचीनमतं॥ एकस्यानेकनायकविषयारतिर्यथा॥ संपत्कस्याद्यताराभवति
न्तरालिनायस्युरोनेत्रतारादृष्टाकेनाद्यकांची॥ यदभिमुखगतावेपतेरत्नकांची॥
उग्नः कस्याद्यतुष्टः सखियदनुगमेकस्यदुर्योभितापोस्नातंकेनाद्यवेणीपयसि
विलुलितायत्कृतेकायवेणी॥ अत्रकिमोबाहुल्येनवेश्यत्वं॥ एकस्यानेकविषयारति
र्यथा॥ पंचेषुक्षितिपप्रतापलहरीप्रीतिस्त्वदीयापुनः कासांनत्तनकांचनाचलतटे
काश्मीरपंकायते॥ कासांमुर्द्धनिनैवनीरजदृशांसिंदूरलेखायतेकासांवानचकर्णयोः
प्रियसखेमाणिक्यभूषायते॥ यत्ररसाबहवः सरसेशबलः॥ यत्रभावाबहवः सभा
वशबलः॥ अत्ररसशबलोदर्शितः॥ भावशबलोयथा॥ यत्कृन्यैवमुभायमेश्रुति
पथंजातेनतस्यावच्चश्यक्कार्ग्रेममकस्परक्षिजगतीशून्याविनाराधया॥ निर्मु

॥रस०॥

कैव मनस्त्वपाम्रगदृशो लावण्यमन्याद्दृशं धिग्जन्मत्वद्गतासि किं विलपितैः का सि प्रसन्ना भव॥ निर्वेदौत्सुक्यामर्षग्लानिविषाददैन्यानां भावानां सांकर्यादेष भावशबल इति॥ अथ रसभावालंकाराणां अभिव्यक्तिः॥ रसस्त्रिविधः॥ अभिमुखो विमुखः परमुखश्चेति॥ भावविभावानुभावैर्व्यक्तैर्यस्याभिव्यक्तिः सोभिमुखः॥ भावविभानुभावानामनुक्तत्वात्कष्टावगमो विमुखः॥ परमुखो द्विविधोलंकारमुखो भावमुखश्चेति॥ अलंकारमुखे अलंकारो मुख्योपमनोविश्रामहेतुत्वात् रसो गौणः॥ भावमुखे भावो मुख्यो मनोविश्रामहेतुत्वात् रसो गौणः॥ अत्र प्राचीनसंमतिः॥ अलंकारे चरुचिरे चित्तविश्रांतिकारिणी॥ अलंकारस्य मुख्यत्वं गौणत्वं रसभावयोः॥ अभिमुखास्त्वस्वप्रकारेण उदाहृता एव॥ विमुखो यथा॥ मैथिलीलक्ष्म

॥नं०॥

॥३८॥

णो रामः सुग्रीवः प नात्मनः ॥ लंकापुरं परित्यज्य पारं वारिनिधेर्ययौ ॥ संकटम
खिलं समुत्तीर्य ते समागता इति अद्भुतो रसः ॥ कष्टादवगम्यते ॥ अलंकारमुखो
यथा ॥ एषा नलेसा भ्रमता मालिनां भाति प्रभाते नवकेरविण्याः ॥ आलिंगितुं वै
षारभानोः कांतिः कलंकस्य वपुर्विलग्ना ॥ अत्रापन्हुतिरलंकारस्य मुख्यता ॥ भा
वमुखो यथा ॥ स सांभोनिधि तीर हार पटलालंकारिणी मेदिनीं दातुं विप्रकुला
य योजितवतः संकल्पवाक्ये धमे ॥ नाभीनीररुहासरोरुह भुवा तत्कालमा
विष्कृते हस्तांभोरुहि भार्गवस्य किमपि व्रीडास्मितं पातु वः ॥ अत्राद्भुतरति
भावमुख्यता दानवीररसो गौणः ॥ विद्वद्वागधिराः स्नेहं तथा वर्षतु संततं

॥रस०८॥ लभन्ते विपुलां वृद्धिं यथा रसतरंगिणी॥ अवगा[स्य]हे स्य वाक्‌देवी दिव्यां रसतरंगिणी॥ ॥तरंगि०॥

अस्मसयेन पभ्नेन रचयश्रुति भूषणं॥ यावद्रानो: कृता कापि कालिंदी भुवि नंदते॥

तावत्तिष्ठति मे भानो रेषा रसतरंगिणी॥ इति श्रीसकलकलासनाथगणपतितनयभा

नुदत्तविरचितायां रसतरंगिण्यां अष्टमस्तरंगः॥ ८॥ सन १२६२ नंदननामसंवत्स

रे आषाढ शुद्ध १० रवीवासरे तद्दिने समाप्तः॥

॥३९॥ ॥३९॥

[OrderDescription]
,CREATED=01.10.20 16:05
,TRANSFERRED=2020/10/01 at 16:17:14
,PAGES=79
,TYPE=STD
,NAME=S0003816
,Book Name=M-1757-RASTRANGINI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,